No. १२३४ घ

Title अभिनवताण्डवे शब्दखण्डः

Author सत्यनाथयतिः

Extent ५१ पत्राणि Age १८५२

Subject न्यायशास्त्रम्

अभिनवगुप्ताचार्यस्य प्राकृतस्तवः

१२३४

५१

अ॰न॰त॰
१

श्रीवेदव्यासाय नमः॥ ॥नमामि नारायणमादिदेवं लक्ष्मीपतिं सर्वगुणोरुदारं॥ शब्दैकगम्यं समतीतदोषं श्रीमध्वहृ-
त्पद्मगतं मुदेहं शिष्यप्रियं वदुस्तर्कसर्पमूर्धनिनर्तनं। पश्चकाश्चप्येक्षत्वंकालिकांगेषु नर्तितं॥२॥ नक्ष्मायस्य पु-
त्रैः वक्तुं सदस्यवादिनः। अभ्यस्ताखिलविद्यायाः श्रयेस्तन्निधिं गुरुं॥३॥ अथ शास्त्रं निरूप्यते। निर्दोषः शब्द आगमः
तस्य दोषाः अबोधकत्वं विपरीतबोधकत्वं ज्ञातज्ञापकत्वं प्रयोजनत्वमनभिप्रेतप्रयोजनत्वं अशक्यसाधनप्रतिपादनं
लघूपाये सति गुरूपायोपदेशनमित्यादयः। इयांस्तु विशेषः। अबोधकत्वविपरीतबोधकत्वं च याथार्थ्यलक्षणप्रामा-
ण्यविरोधि अप्रयोजनादयस्त्वलक्षणाप्रामाण्यविरोधीनि दोषवाक्यमिति बालरुतं वाक्यं चाकाङ्क्षायोग्यतासंनिधिमता
पदानां समूहः। नन्वागमो न प्रमाणं। यथार्थज्ञानजनकत्वनियमाभावात्। यदेवहितत्वमस्यादिवाक्यं कस्यचिद्यथा-
र्थज्ञानजनकं तदेव कस्यचिदयथार्थज्ञानजनकं दृश्यते लोकेऽपि आप्तताभिमतस्य किंचिद्वाक्यं प्रमाजनकं दृश्यते।
अन्यस्य वाक्यमप्रमाजनकं दृश्यते। प्रत्यक्षप्रमाजनकं तद्रूपि न नियमेनाकस्यचिन्नेनैव भ्रमोत्पाददर्शनात्। अत एवासोत्र वीति अ

राम॰
१

न्मन्मयोक्तं॥ अन्यदेवत्वं जानासीति न चैवं भूतस्यापि प्रामाण्यं युक्तं। अतिप्रसंगात्। इति चेन्न। निर्दोषवाक्यस्य नियमेन प्र
माजनकत्वात्। यदत्रोक्तं तत्त्वमस्यादिवाक्यं कस्यचित्प्रमाजनकमिति तत्तथैव तथापि न प्रमाजनकत्वस्वभावत्वप्रामाण्य
हानिः। अयथार्थज्ञानजनकत्वस्य श्रोत्रदोषनिबंधनत्वेनास्वाभाविकत्वात्। यदपि चोक्तं मामत्वाभिमतस्य किंचिद्वाक्यं प्र
माजनकं किंचिन्नेति तदपि न। आप्तस्य सर्वत्राप्तत्वाभावात्। यदेव हि प्रमाजनकं तदाप्तमूलकं। यच्चाप्रमाजनकं। न तदा
प्तमूलकं इति तस्य प्रमाजनकत्वाभावेऽप्यप्रमाजनकत्वं च नाप्तवाक्यस्य प्रामाण्यविघातकं। यदपि यच्च प्रमाजनकं तदन
मेन प्रमाजनकमिति तदपि न। प्रामाण्यविघातकं भ्रमजनकत्वस्य श्रोत्रदोषनिबंधनत्वात्। नन्वथापि शब्दो न प्रमाणं निर्विष
यत्वात्। विषयो हि द्विविधः। अपरोक्षः परोक्षश्चेति तत्राद्यः प्रत्यक्षस्य विषयः। द्वितीयस्त्वनुमानस्य विषयः। न चातिरिक्तं विषय
मीक्षामहे येन विषयेण शब्दः प्रमाणं स्यात्। यद्यपि शब्दः परोक्षज्ञानजनकः तथापि विषयात्वन्यतेज्ञातज्ञापकस्य स्मृतिसाधनस्य
चमानांतरविषयप्रवृत्तत्वात्। अप्रामाण्यमेवं सत्यपि शब्दः असंकीर्णविषयाभावादप्रामाण्यमिति चेन्न। यथा अपरोक्षविषय
हे

त्वाविशेषेपिश्रोत्रादिविषयासंकीर्णविषयत्विश्वयेचक्षुपदेः प्रामाण्यमवर्जनीयं तद्वत्परोक्षवि[illegible]षयत्वाविशेषेप्यनु
मानविषयासंकीर्णस्वर्गादिगतविषयविशेषसिद्धये शाब्दप्रामाण्यमप्यवर्जनीयत्वात् न हि स्वर्गापवर्गादिगतो विशेषोनुमान
वेद्यः येन शाब्दस्य निर्विषयत्वं स्यात्। अन्यथा परोक्षविषयत्वाच्छब्द एव प्रमाणं। अनुमानं तु निर्विषयत्वादप्रमाणमेवेति स्या
त्॥ ॥इति शाब्दप्रामाण्यसमर्थनं॥ ॥मणिकारस्तु॥ अथ शब्दो निरूप्यते। प्रयोगहेतुभूतार्थतत्त्वज्ञानजन्यः शब्दः प्रमा
णं॥ ननु शाब्दो न प्रमाणं तथा हि करणविशेषः प्रमाणं करणं च तत् यस्मिन्सति क्रिया भवत्येव न च शब्दे सति प्रमा भवत्येवेति
नायं प्रमाणं। न च शब्दः प्रमाणमिति वाक्यप्रामाण्याप्रामाण्ययोर्व्याघातः। अप्रामाण्येपि एतदुत्थाप्यानुमानाविसंवादादि
ति चेत् न। आकांक्षादिमतः पदार्थस्मरणादिव्यापारवतः प्रमाणत्वे न तथाभूतात्समोत्पन्नेनावश्यकत्वात्। अतथाभूतत्वे च
फलाजनकत्वस्य कारणान्तरसाम्यात्। इत्याह तत्र। अपौरुषेयवेदाव्याप्तः। त्वन्मते प्रतिपुरुषं भारतभेदेनाविद्वत्सहृदयमान
भारताव्याप्तेश्च। न चाविद्वत्सहृदयमानभारतस्यापि ईश्वरीयवाक्यार्थतत्त्वज्ञानजन्यत्वमस्त्येवेति निर्व्याप्तिरिति वाच्यं। तस्येश्वरी

यद्वा यथार्थतत्त्वज्ञानजन्यत्वेपि स्वसमानविषयकयथार्थतत्त्वज्ञानत्वेन तज्जन्यत्वस्य तत्राभावात्। विवक्षितं च स्वसमानवि
षयकयथार्थज्ञानत्वेन कारणत्वं स्वसमानविषयकयथार्थतत्त्वज्ञानत्वेन तद्धेतुत्वाद्यथार्थज्ञानत्वं यत्र जनकतावच्छेद
ककोटिप्रविष्टं तादृशतत्त्वज्ञानजन्यत्वपर्यवसन्नमिति रुचिदत्तोक्तेः। न चान्यत्रेश्वरज्ञानत्वेन कारणत्वेपि अन्यत्र यथार्थ
ज्ञानत्वेन कारणत्वं कल्प्यत इति वाच्यं। कल्पकाभावात्। न च प्रमाणप्रस्य गुणजन्यत्वेन तद्यथाप्रामाण्यान्यथानुपपत्त्या ईश्वर
ज्ञानस्य तेन रूपेण कारणत्वं कल्प्यत इति वाच्यं॥ अन्यत्रैवात्रापीश्वरज्ञानत्वेन कारणतोपेश्वरज्ञानस्य स्वसमानविषयकत
मात्रेण वाक्यादिप्रमाणोपपत्तौ तस्य स्वसमानविषयकयथार्थज्ञानत्वेन कारणत्वकल्पनायोगात्॥ साक्षात्कर्तृज्ञानस्य प्र
माणप्रयोजकत्वेनेश्वरज्ञानस्य प्रामाण्यप्रयोजकत्वात्। अन्यथा वाक्यप्रामाण्ये न तत्कर्तृज्ञानसिद्धिर्न स्यात् ईश्वरज्ञानेन तद्वा
क्यप्रामाण्यस्यान्यथासिद्धत्वात् च रुचिदत्तस्तु॥ ॥स्वार्थतत्त्वज्ञानजन्यतावच्छेदकावच्छिन्नशब्दत्वं लक्षणं। तज्जन्यतावच्छे
दकं च योग्यशब्दत्वं तच्च मोनिश्लोकादावप्यस्त्येवेति नातिव्याप्तिः। शब्दपदं च ज्ञानस्य रूपयोग्यशब्दपरं। अतो योग्यताविशिष्टे घटः क

र्थत्वमित्यादिशब्देनातिव्याप्तिरित्याह। तन्न। स्वार्थतत्त्वज्ञानाजन्ये वेदे अविद्यमानमात्रतादेव वर्तमानस्य पौरुषेयत्वस्य
तज्जन्यतावच्छेदकत्वायोगात्। अनतिप्रसक्तस्यैवावच्छेदकत्वात्। यद्यपि तच्च मौनिश्लोकादावस्त्येवेति नाव्याप्तिरिति तद्
पि न मौनिश्लोकस्य स्वार्थतत्त्वज्ञानजन्यत्वेन मूलोक्तप्रयोगहेतुभूतार्थतत्त्वज्ञानजन्यत्वरूपलक्षणासद्भावात् अव्याप्तिश्
कायोगेन तत्परिहाराय स्वार्थतत्त्वज्ञानजन्यतावच्छेदकावच्छिन्नत्वविवक्षायोगात्। वर्णानित्यत्ववादिमते मौनिश्लोक
स्यासत्त्वेन तत्र लक्षणानुत्पादनायोगाच्च। न हि तन्मते नुच्चारितः शब्दोऽस्ति यत्तु मौनिश्लोकस्यानुच्चारितत्वेन कथमर्थज्ञानज
न्यत्वमित्याशंक्य कदाचिदवश्यं तद्घटकपदानामुत्पादस्य स्वीकरणीयत्वेनावश्यं तत्संभवात्। अन्यथा तत्सालीकत्वापातेन
मौनिलिखितलिप्यादिना तदनुमानस्याप्यसंभवादिति तत्समर्थनं तदपि न। तद्घटकपदानामुत्पादेऽपि वाक्यस्यानुत्पन्नत्वेन वा
क्यार्थतत्त्वज्ञानजन्यतासंभवशंकापरिहारात्। न हि अन्यस्य जन्यत्वेनाजन्यस्य तत्त्वज्ञानजन्यत्वासंभवशंकापरिहारो युक्तः।
अतिप्रसंगात्। कदाचिदुत्पन्नानामाशुतरविनाशिनां तद्घटकत्वायोगाच्चापदपि च अन्यथा तत्सालीकत्वापातेनेत्यादि तद

पिनात् तद्घटकपदानामुत्पत्त्यंगीकारे शाब्दमोनिश्लोकस्यालीकत्वापरिहारात् नच मोनिश्लोकस्यैकालीकत्वपरिहारायक
दाचिदुत्पन्नत्वांगीक्रियत इति वाच्यं मोनिश्लोकत्वाभावापातात्। नहि अन्येन कदाचिदुत्पन्नस्य मोनिश्लोकत्वं युक्तिमत् पूर्वमु
त्पन्नस्योत्पत्स्यमानस्य वा इदानीमभावेन लिप्यादिना तदनुमानायोगाच्च नहि लिपिः मोनिश्लोकं अतीतत्वेन एष्यत्वेन वानु
मापयति इति येन कदाचिदुत्पादांगीकारः सार्थकः स्यात्। यदपि शब्दपदं ज्ञानस्य स्वरूपयोग्यशब्दपरं अतोऽयोग्यताविशिष्टे घ
टः कर्मत्वमित्यादिवाक्ये नातिव्याप्तिरिति तदपि न। घटः कर्मत्वमानयनं कृतिरित्यस्य निरर्थकत्वात्। स्वार्थाभावेन स्वार्थतत्त्व
ज्ञानजन्यतावच्छेदकावच्छिन्नशब्दत्वस्यमुतएमभावात्। अतिव्याप्तेरभावेन शब्दपदस्य ज्ञानस्वरूपयोग्यशब्दपरत्वविवक्षावै
य्यर्थ्यात्। ननु योग्यशब्दत्वावच्छिन्नशब्दत्वं लक्षणत्वेन विवक्षितं तच्च घटः कर्मत्वमानयनमित्यादावस्त्येवेत्यतिव्याप्तिरिति तत्परि
हाराय विवक्षा युक्तेति चेन्न ज्ञानस्वरूपायोग्यशब्दत्वस्यासाधनस्याहतत्वात्। नच ज्ञानस्वरूपायोग्यबाधितार्थकत्वलक्षणायोग्य
त्वं युक्तमिति वाच्यं तज्जन्यज्ञानविषयस्य तदर्थत्वायोगेनाबाधितार्थकत्वासंभवात्। तदपि न। चनशब्दः प्रमाणमिति वाक्यज्ञा

माणप्रामाण्ययोर्व्याघात इति तदपि न। शाब्दः प्रमाणमिति वाक्ये पूर्वपक्षाशंकितस्याविलंबेन प्रमाजनकत्वरूपप्रामाण्याभा
वस्य सत्त्वेपि शब्दप्रामाण्यप्राप्त्यभावेन व्याघाताभावात्। नहि परेणाशब्दस्यबाधितार्थकत्वरूपमप्रामाण्यमुक्तं येन शब्देन
प्रमाणमिति वाक्यप्रामाण्याप्रामाण्ययोर्व्याघातः स्यात्। अत एव एतदप्रामाण्ये एतद्विषयीभूतशब्दाप्रामाण्य न शब्दप्रामा
ण्याभ्युपगमात्। एतत्प्रामाण्ये शब्दादेवेत्युभयथापि व्याघात इत्यर्थ इति कश्चिदतोक्तं निरस्तं॥ शाब्दो न प्रमाणमिति वाक्यस्य
शंकितप्रामाण्यप्रयुक्तत्वपि विषयबाधाभावेन शब्दप्रामाण्यप्रसक्त्यभावेन व्याघाताभावात्। यदपि अस्य प्रामाण्ये वि
एतदुत्थाप्यानुमानाविसंवादादिति समाधानं तदपि न। अविसंवादादित्यस्य न व्याघात इति प्रकृतसाध्यासाधकत्वात्।
नहि माता वंध्येति वक्तारं प्रति व्याघाते चोदिते मातृत्वं प्रामाणिकमिति वचनं युक्तिमत्। येन शाब्दो न प्रमाणमित्यत्र व्याघा
तपरिहाराय शब्दप्रामाण्येऽनुमानचोदनं युक्तं स्यात्। यत्तु शब्दस्य प्रमायाः सजनकत्वेपि शाब्दो न प्रमाणतया च वक्त
व्यः प्रमायोगव्यवच्छिन्नत्वाभावादिसाधकस्यापि तानुमानस्येत्यर्थ इति। कश्चिदत्र व्याख्यानं तदप्ययुक्तं न व्याघात इति पूर्ववा

केनान्वयानिरूपणात्।वाधितार्थकत्वावाधितार्थकत्वाभ्यांव्याघातशंकायास्तथैवमुक्तादित्तत्वात्।अप्रामाण्येपिइतिमू
लस्यवाधितार्थकत्वेपीतिव्याख्यानस्योचितत्वेनप्रमायामजनकत्वेपीतिव्याख्यानायोगाच्च।पक्षधरस्तु।द्विविधंहिअप्रामा
ण्यंप्रामाऽप्रमाजनकत्वंचेतितत्रद्वितीयाभ्युपगमस्यविषयवाधानांतरीयकत्वेपिप्रथमेनतथेत्याह।एतदितिनचाप्रमाज
नकत्वेप्रमाणेत्वापकत्वमपिकथमितिवाच्यंशब्देनपदार्थमात्रस्मरणेनतत्संसर्गाग्रहेणोक्तानुमानाद्यवतारसंभवादितिभावः।अ
नुमानंचशब्दोनप्रमाणंतयाअवहर्तव्यइत्याकारकंअन्यथाप्रमायोगव्यवच्छिन्नत्वस्यैवप्रमाकरणस्वरूपतयासाध्याविशेषादि
त्याह॥सत्कूलदम्बा॥ ।द्वितीयपक्षस्यैवविषयवाधनांतरीयकत्वेनद्वितीयाभ्युपगमस्येष्टत्वयोगात्।एतदुक्त्याप्यनुमानाविसंवा
।दादित्यस्यपूर्ववाक्येनसंगतत्वनिरूपणायअपन्तुअनुमानंचशब्दोनप्रमायातयाअवहर्तव्यइत्याकारकमितितदपिन।नाममात्रेविवा
दायोगेनशब्दवाच्यताभावसमर्थनंवैयर्थ्यात्।तदपिअप्रमयाप्रमायोगव्यवच्छिन्नत्वस्यैवप्रमाकरणत्वरूपतयासाध्याविशेषादि
तितत्रवक्तव्यंप्रमायोगव्यवच्छिन्नत्वाभावेविवादोक्तिनवानायः।तस्मात्संदिग्धत्वेनहेतूकरणायोगात्।द्वितीयेनाममात्रेविवादायोगे

अ॰न॰ता॰

५

5

नानुमानेवैयर्थ्यमेव दोष इति॥ ॥इति मणिकृदागमलक्षणभंगः॥ ॥ननु शब्दो न स्वातंत्र्येण प्रमाणं प्रवृत्तिनिवृत्तिजननोपयो
गित्वात् जननसामर्थ्यविधुरत्वात् तथाहि इदमहं कुर्यामिदं मया कार्यं ममेदमिष्टसाधनमित्यादिज्ञानं प्रवर्तकं नेदं कुर्यामिदं मम
या न कार्यं ममेदमनिष्टसाधनमित्यादिज्ञानं निवर्तकं इत्स विनादं प्रवर्तकस्य पुरुषः इदमहं कुर्यामिदं मया कार्यं ममेदमिष्टसाधन
मिति न प्रयुङ्क्ते। किंतु त्वं कुरु त्वयेदं कार्यं तवेदमिष्टसाधनमित्याद्येव वदति। एवं निवर्तकपुरुषस्यापि प्रयोगो द्रष्टव्यः नच त्वं कुरु इ
त्यादिमध्यमपुरुषप्रयुक्तवाक्यघटितस्य शब्दस्यास्मच्छब्दोत्तमपुरुषोल्लेखिधीजननसामर्थ्यमस्ति। अन्यथा घटोऽस्तीति वाक्यस्यापि घट
शब्दोल्लेखिधीजनकत्वं स्यादविशेषात्। तस्मादकामेनापि त्वं कुर्वित्यादिशब्दात् युष्मच्छब्द मध्यमपुरुषोल्लेखिनी धीरुदेतीति अ
स्मच्छब्दाद्युल्लेखिप्रवर्तकज्ञानं तु अनुमानादिना भवतीत्यभ्युपगंतव्यं॥ उच्यते॥ युष्मत्सापेक्षो हि शब्दोऽर्थप्रत्यायकः न स्वतंत्र्यं त्वन्निश्च
घटादिशब्दानामन्यप्रकाराः त्वमहमादिशब्दानामन्यप्रकाराः अतो घटादिशब्दाः स्वरूपसत्तिप्रकारानुरोधेन घटादिशब्दोल्लेखिनी धि
यमुत्पादयंति। त्वमहमादिशब्दास्तु व्युत्पत्तिग्रहकाले संबोध्यत्वप्रयोक्तृत्वादिप्रयोगोपाधिकाः एते शब्दा इति गृहीतत्वात्। न तच्छब्दो

एम॰

ह्लेखिं नीधियं जनयंति। तथा हि पुरुषांतरस्य संबोध्यत्वप्रयोगोपाधिकत्वात्। प्रयोक्ता अहं कुर्यामिति योधजननाय त्वमिति
पुरुषांतरं प्रयुंक्ते। तदधीनत्वात्। कुर्विति मध्यमपुरुषं प्रयुंक्ते। तस्मात् शब्दात् श्रोतुर्बुद्धिस्तिवृशेन अस्मच्छब्देन मपुरुषांत
शब्दो ह्लेखिनीधीहृदेति एवमहं कुर्यामित्यादिशब्दादयं करिष्यतीति धीहृदेतीति शब्दस्य प्रवर्तकत्वात् जनकत्वं नानुपपन्न
मिति॥ इति स्वमते शब्दस्यांतरसमर्थनं॥ ॥वैशेषिकास्तु मन्यंते शब्दो न प्रमाणांतरं। पदार्थसंसर्गस्यानुमानादेव सिद्धेः। त
था हि विमतानि पदानि तात्पर्यविषयत्वस्मारितार्थसंसर्गज्ञानपूर्वकानि। आकांक्षादिमत्पदकदंबकत्वात्। वघटमान
येति मत्प्रयुज्यमानपदसमूहवत्। यद्यपि अत्र संसर्गज्ञानपूर्वकत्वमेव साध्यते तथापि तत्सिद्धिदशायामेव तानावच्छेद
कतया संसर्गः सिध्यति संसर्गस्य संबंधिन एव विशेषत्वात्। पक्षधर्मतावतादृतापकत्वेनागृहीतस्यापि संसर्गविशेषस
सिद्धिः। अथ — एते पदार्थाः मिथः संसर्गवंतः आकांक्षादिमद्भिः पदैः स्मारितत्वात्। गामभ्याजेति पदार्थसार्थसावत् इत्यनुमा
नात्साक्षादेव संसर्गसिद्धिरिति। तत्राप्याहुस्सनदृष्टकृप्रमाणपमितिवदता अनुमानत्वेन प्रमाणसांगीकृतत्वात् शब्दस्य हेतू

कर्तव्यत्वेनाकांक्षादिमत्त्वदकदंवत्वस्याकांक्षादिमत्त्वदस्माभिस्तत्वस्यवाहेतूकरणायोगात् योग्यतासंदेहदशायां अपिप्र
वर्तकीभूतज्ञानदर्शनात्। संदिग्धस्यलिंगस्यतज्जनकत्वायोगेनशाब्दस्यातं असावर्जनीयत्वाच्चाज्ञानावच्छेदकतयासंस
र्गसिद्धेः अप्रवर्तकत्वेनप्रवर्तकसंसर्गज्ञानाय। शाब्दभ्रमापस्यवक्तव्यत्वात् तच्चाभ्रमयाऽज्ञतज्ज्ञानवानयमितिभ्रांतिक
स्यापिपुरोवर्त्तिनिप्रवृत्तिःस्यात् किंच एतेपदार्थाः इतिअविशेषेणस्मृताःसर्वेपिपदार्थाः प्रसीकियंतेउतव्यक्तिविशेषाः नाद्यः
नाधातात्। नहिनदीतीरस्थयावत्फलानांचाधाराधेयभावोस्तियेनवाधोनस्यात् नद्वितीयः। विशिष्यस्मरणाभावात्। नचपदतात्प
र्यवशात्। अन्वयप्रतियोगिविशेषस्मृतिर्भविष्यतीतिवाच्यं विशेष्यपदार्थोपस्थितिंविनाविशिष्यतात्पर्यग्रहायोगात्। अपि
चकिमियंलौकिकीप्रतीतिराहोस्वित् आप्तसमयानुरोधादेवमुच्यते। नाद्यः। शाब्दभ्राविर्णांशष्टादेवार्थसिद्धिरितिप्रतीयमानत्वे
नशाब्दपक्षकस्यार्थपक्षकस्यवाअनुमानस्याप्रवृत्तेः। नद्वितीयः। आप्तसमयस्यशपमात्रीकृतात्। किंचपदार्थानुमानेपर्वतोग्नि
मानितिप्रतिज्ञामात्रे शोषवपर्वतोग्निसंसर्गसिद्धेर्हेत्वाद्यभिधानवैयर्थ्यंस्यात्। नचापितनिश्चयाभावेनाकांक्षादिमत्त्वदकत्वनिश्चया

भावान्न संसर्गसिद्धिरिति वाच्यं। शब्दस्वातं अभावेप्यनुमानस्याप्रवृत्तेः संसर्गज्ञानाभावेन कृतइति आकांक्षोदयाभावप्रसं
गात्। किंचानाप्तवाक्याज्ज्ञानमुत्पद्यते न वा नेति पक्षे निषेनिषेधानुपपत्तिः। आद्येपि तज्ज्ञानं तशाब्देन भवति उक्तलिंगेन नाद्यः॥ अ
पत्तिज्ञांतात्। नापि द्वितीयः। लिंगाभावात्। न चायोग्यपदकदंबकत्वेन संसर्गभ्रमपूर्वकत्वादनुमानं प्रमाणमिति वाच्यं विसंवादिप्र
कवाक्ये व्यभिचारात्॥ ॥इतिवैशेषिकोक्तशब्दस्वातंत्र्यभंगः॥ ॥३॥ आकांक्षा च संभूयैकान्वयप्रतीतिजननसामर्थ्यं पद
प्याकांक्षाशब्दइच्छापर्यायरूढः तथापीहलाक्षणिकार्थो विवक्षितः। न च प्रयोजनाभावाल्लक्षणायोग इति वाच्यं। दंडेहि घटजननाय
चक्रचीवरादिकमाकांक्षतदिप्रयोगदर्शनेन रूढलक्षणात्वात्प्रमाणिकारक्त॥ ॥अभिधानापर्यवसानमाकांक्षा। यस्य येन विना स्वा
र्थान्वयानुभावकत्वं तस्य तदपर्यवसानं। नामधात्वाख्यातक्रियाकारकपदानां परस्परं विना परस्परं न स्वार्थान्वयानुभवजनकत्वं इत्या
हा तन्न। आनयेति पदस्य घटमिति पदाभावेपि करीरमिति पदेन सह तात्पर्यविषयीभूतस्वार्थान्वयबोधकत्वे न घटमिति पदेन सा
कांक्षात्वाभावप्रसंगात्। न च यस्य पदस्य येन पदस्य पर्यायेण वा विना न स्वार्थान्वयानुभावकत्वं तत्तेन साकांक्षमिति विवक्षितमिति वाच्यं

अ॰व॰ता॰
८

।गंगायांघोष इत्यत्रघोषपदस्य तीरतत्पर्यायाभ्यां विनापि गंगायामिति पदेन सह स्वार्थान्वयानुभावकत्वदर्शनेन घोषपदस्य तीरपदेन
साकांक्षत्वाभावप्रसंगात्। न चेष्टापत्तिः। कदाचित्तीरे घोष इत्युक्तेप्यन्वयबोधाभावप्रसंगात्। न च पदस्य स्वार्थान्वयप्रतियोग्युपस्थापक
पदसामान्यस्याभावान्न स्वार्थान्वयानुभावकं तत्तदुपस्थापकमात्रेण प्रत्येकं साकांक्षत्वमिति विवक्षितमिति वाच्यं। पदस्य स्वान्वयप्रति
योग्युपस्थापकत्वं साकांक्षत्वमित्येतावतैव पूर्त्तौ तेन त्वदुक्तगुरुभूतलक्षणांगीकारायोगात्। न त्रुपदस्य स्वमन्वयप्रतियोग्युपस्था
पकत्वं साकांक्षत्वमित्यप्युक्तं। जनितान्वयबोधेष्वतिव्याप्तेरिति चेन्न। तेषामपि लक्ष्यत्वात्। न च जनितान्वयबोधेनापि पुनरन्वयबोधा
पत्तिः। अन्वयबोधं हेतोः पदोपस्थितेः विनश्यदवस्थापन्नत्वात्। यद्वोक्तं रुचिदत्तेनात्र पदपदं तदुपस्थितिपरं तेन मौनिश्लोकाव्या
प्तिः पदस्य स्वभावत एवाननुभावकत्वेनासंभवश्चेति दोषद्वयमलग्नकं बोध्यमिति तदपि न। मौनिश्लोकस्येवासत्त्वेन तत्राव्याप्ति
परिहाराय विवक्षाकरणायोगात्। न हि परमते मौनिश्लोका नाम प्रसज्यते। तथा हि श्लोको नामानुपूर्वीविशेषावच्छिन्ना वर्णाः। ते च पर
मते ताल्वोष्ठपुटव्यापारजन्या एव न तु नित्याः। न च मौनीना ताल्वोष्ठपुटव्यापारेण न तदभावे च तत्श्लोकाभावः सिद्ध एव। कारणा

राम॰
८

भावेकार्यस्यायोगात्। किंच समीपस्थस्य समनन्तरस्यावधित्वस्य दुःश्रोत्रग्राह्यत्वात् एव। न च मौनिश्लोकस्तथाविधेन गत्यंतरेऽस
त्त्वेव मौनिश्लोको भ्रमरूपः गंतव्यः। पदस्य स्वत एवाननुभावकत्वादित्यप्ययुक्तं। पदानामन्वयाननुभावकत्वे पदोपस्थितेरनुभा
वकत्वाभावप्रसंगात्। न हि पदोपस्थितिः पदोपस्थितिरित्येव घटान्वयबोधहेतुः घटपदोपस्थितेरपि घटस्यान्वयबोधहेतुत्वप्रसं
गात्। किं नामान्विताभिधाने शक्तपदोपस्थितित्वेन तथा च पदानामननुभावकत्वमकामेनाप्यभ्युपगंतव्यं परंतु पदानां ज्ञातकरणा
त्वात्। तदुपस्थितिरपि हेतुरिति यदपि पदपदं तदुपस्थितिपरमिति विवक्षया दूषणद्वयमलग्नकं बोध्यमिति तदप्ययुक्तं। अविवक्षा
दशायां दोषद्वयस्यालग्नकत्वेन तद्विवक्षया अलग्नत्वाभिधानायोगात्। न हि अव्याप्तावसंभवो भवति असंभवे वाव्याप्तिर्भवति
विरोधात्। येन दूषणद्वयपरिहाराय पदोपस्थितिविवक्षा युक्ता स्यात् ४ इति मण्युक्ताकांक्षालक्षणभंगः। सेयमाकांक्षा न शा
ब्दधीहेतुः न वा तद्ज्ञानं किं नामाकांक्षावंति अनुसंहितानि पदान्यव शाब्दधीहेतवः॥ आकांक्षायाः संभूयार्थान्वयप्रतीतिजनकसाम
र्थ्यरूपत्वात्। न हि सामर्थ्यकारणं असमर्थस्य कारणत्वायोगेन तत्रापि सामर्थ्यं वाच्यं तस्याप्येवमित्यनवस्थाप्रसंगात्। पदानामन्व

अ·न·ता·
८
१

यबोधसामर्थ्यसद्भावेप्युत्पत्तिमतः सामर्थ्यज्ञानविलंबेन कार्यविलंबदर्शनाच्च। न चैवं सति अयमेति पुत्रो राज्ञः पुरुषोऽपसा
र्यतामित्यत्र राजपदस्य पुत्रपदेनेव पुरुषपदेनापि साकांक्षत्वात्। पुरुषपदेनाप्यन्वयबोधापत्तिरिति वाच्यं। पुत्रपदेनान्वय
तात्पर्यग्रहस्य प्रतिबंधकत्वात्। ततः पूर्वं तु भवत्येवान्वयबोधः। तथा हि अयमेतीति वाक्यश्रवणे द्वावन्वयबोधौ भवतः। रा
ज्ञः पुत्र इत्येकः राज्ञः पुरुष इत्यपरः। ततः पुनरेष विचारो जायते। कः पुनरनयोरभिप्रेत इति। ततस्तात्पर्यगवेषणाय प्रवर्त्त
ते प्रकरणादिवशात्। पुत्रपदान्वयतात्पर्यग्रहे पुनरनुसंहिते न वाक्येनायमेति राज्ञः पुत्र इत्यवधारणारूपतातात्पर्यविषया
न्वयविषयकं ज्ञानं जन्यते। तात्पर्यग्रहप्रतिरुद्धत्वात्। राजपदस्य न पुनः पुरुषपदेनान्वयबोध उदेति। प्रागुत्पन्नस्तु पुरुष
पदार्थान्वयबोधो नाद्रियते। तात्पर्यानुपपत्त्या यष्टीः प्रवेशयेत्यादौ दंडप्रवेशबोधवत्॥ ॥इत्याकांक्षातद्ज्ञानयोः कारण
त्वभंगः॥ ॥योग्यता चाबाधितार्थकत्वं सा च प्रामाण्यप्रयोजिका इयं चापरा योग्यता। यत् अन्वयप्रयोजकरूपवत्वं। सा चा
र्थनिष्ठे च द्रवद्रव्यत्वादिरूपा। इयं च न शाब्दधीहेतुः वह्निना सिंचेदिति वाक्यादन्वयबोधदर्शनात्। नापि तद्ज्ञानमनेनैव वाक्ये

ए.म.
८

नतद्व्यतिरेकनिश्चयेपि अन्वयबोधदर्शनात्। किंतु इदमस्यां क्रियायां योग्यमिति व्यवहारहेतुः अत एव लौकिकाः जलेन सिंच
तीति वक्तारं बाधितार्थकत्वं ज्ञात्वापि योग्यमेवायं सेककरणत्वेन ब्रवीति अग्निना सिंचेदिति वक्तारं तु अयोग्यमेवायं ब्रवीति
।ति वदंति नापि प्रामाण्यप्रयोजिका जलेन सिंचतीति अनाप्तवाक्यत्वसद्भावेपि अप्रामाण्यदर्शनात्। आद्याप्रामाण्यप्रयोजिका
पि न शाब्दधीहेतुः तदभावेपि शाब्दभ्रमदर्शनात्। नापि तज्ज्ञानं तद्व्यतिरेकनिश्चयेपि अग्निना सिंचेदिति वाक्यादर्थावगमदर्शना
त् अन्यथा वधिरकलहापत्तिः॥ ॥इति स्वमते योग्यतानिरूपणं॥ ॥अत्राहुर्गंगेशाः बाधकप्रमाविरहो योग्यता। सा चेतरपदा
र्थसंसर्गे अपरपदार्थनिष्ठात्यंताभावप्रतियोगित्वप्रमाविशेष्यत्वाभावः प्रमेयं वा अस्मिन् प्रमेयनिष्ठात्यंताभावप्रतियोगित्वप्र
माविशेष्यत्वं गोत्वे प्रसिद्धं॥ वाच्यत्वसंसर्गे तदभावः वस्तुतस्तु इतरपदार्थसंसर्गे अपरपदार्थनिष्ठात्यंताभावप्रतियोगितावच्छेदकध
र्मशून्यत्वं योग्यता सेयं न स्वरूपसती प्रयोजिका किंतु संशयविपर्ययप्रमासाधारणं तज्ज्ञानं हेतुरिति स्थूलदृष्ट्या। बाधकप्रमाविर
हो योग्यतेति योग्यताया निरूपितत्वेन पुनः सा चेति योग्यतानिरूपणाय योग्यतापरामर्शायोग्यात्। प्रमाविरहरूपायाः योग्यतायाः

अ॰नं॰ता॰
९
१

प्रमविशेष्यत्वाभावरूपात्वाभिधानायोगाच्च॥ किंचापरपदार्थस्यत्र अपरत्वे पदविशेषतां अपरंपदस्यदमिति आहोस्वीत्। पदार्थ
विशेषणं अपरोयः पदार्थ इति नाद्यः। पञ्जेतेतेति पदस्य पागेष्टसाधनताबोधकस्याप्यन्वययोग्यत्वप्रसंगात्। न द्वितीयः। प्र
मेयत्वे प्रमयत्वमितिवाक्यस्य योग्यत्वप्रसंगात्। वृक्षे कपिरितिवाक्यस्याप्ययोग्यत्वप्रसंगात्। अच तत्र पदपदार्थभेदे विद्यमा
नेपि एकपदार्थसंसर्गस्याप्यबाध्यत्वेन अपरपदार्थनिष्ठासंताभावप्रतियोगित्वप्रमाविशेष्यत्वात्। पक्षधरस्तु॥ मएयुक्त
लक्षणस्यद्रूपतामाशंक्यविवक्षां हत्वा समादधे तथाहि अत्र वदंति नेदं लक्षणं प्रकृतं गंधवानाद्यक्षणावर्त्ती घटइत्यादयपिक
वासंयोगं स्यात्। प्रागभावस्यत्वेप्यसंताभावप्रतियोगित्वाभावात्। एवं ध्वंसस्थलेपि अपिचद्रव्यं संयोगीस्यपिवाक्यमयोग्यं। स्या
त् तन्निष्ठास्यंताभावप्रतियोगित्वात् संयोगस्येति अत्रवयं ब्रूमः। तात्पर्यविषयीभूतसंसर्गेतदाश्रयत्वाभिमतापरपदार्थनिष्ठ
धर्मविरोधित्वप्रमाविशेषत्वाभावो योग्यता तथा च तात्पर्यविषयविशिष्टवैशिष्ट्यसंसर्गेताद्दशज्ञानाभावाद्यविरोधीतिना
व्याप्तिः संयोगिद्रव्यमित्यत्रापिसामानाधिकरण्यमात्रेनाविरोध इतिनायोग्यत्वं विशिष्टवैशिष्ट्ये तु विरोध एवेति नयोग्यतायाः अति

राम॰
९

न्ज्ञानेयत्ज्ञानंनेत्यस्यैव विरोधित्वादिति संक्षूदस्या।गंधप्रागभावावच्छिन्ने घटे गंधसंसर्गस्य समवायस्य नित्यत्वात्।प्रागभा
वाभावे न प्रागभावसत्त्वेपीति परोक्तातिव्याप्तिमुत्सादनस्याज्ञानमूलकस्य स्वीकारायोगात्।। नच गंधवान् घट इत्यत्र भास
मानः संसर्गो न समवायः अपितु विशेषणताविशेषः स चानित्य इति तत्प्रागभावः तत्र नोपपन्न इति वाच्यं।गंधवानित्यत्र समवाया
भावे समवायस्यालीकतापातात्।। तस्यान्यत्राभावात्। एवं धूमानुमाने विशेषणताविशेष एव हेतुतावच्छेदकसंबंधः स्यात् तथा
च धूमस्य धूमावयवे व्यभिचारस्यात् इत्थं संयोगी स्वत्र दंडीत्यादौ दंडसंबंधस्यैव संयोगीसत्रापि संयोगसंसर्गस्यैवमनुवर्थतया
ग्राघत्वात्। तस्य च समवायत्वेन द्रव्यनिष्ठासंताभावप्रतियोगित्वप्रमाविशेष्यत्वाभावादव्याप्तेरभावेन तत्स्वीकारायोगाच्च। अथ
संयोगी एवान्वयप्रतियोगीसमभ्युपगम्यते तथापि ताव्याप्तिः तादात्म्यस्य संसर्गत्वात्। तस्य च द्रव्यनिष्ठत्वेन तन्निष्ठासंताभावप्रति
योगित्वाभावात् तात्पर्यविषयसंसर्गेन दाश्रयत्वाभिमतनिष्ठत्वमित्येतावतैव संसर्गत्वेन तन्निष्ठधर्माविरोधित्वप्रकारकप्रमाविशे
ष्यत्वाभावपर्यंतधावनायोगाच्च। यदपि संयोगिद्रव्यमित्यत्रापि समानाधिकरणपमात्रेन विशेष इतिना—योऽप्यता विशिष्टवैशिष्ट्यो

अ॰ त॰ ता॰
१०
10

तु विरोध एवेत्ययोग्यतेति तदपि न द्रव्यं संयोगीति वाक्यस्य द्रव्यत्वसमानाधिकरणतया संयोगबोधने विरोधाभावेन योग्यत्ववत्
द्रव्यत्वविशिष्टे सर्वत्र संयोगवैशिष्ट्यबोधनेपि विरोधाभावेन योग्यतासद्भावात्। एतेनैवासंतताभावपदं विरोधिपरं तेन गंधप्राग
भावावच्छिन्नो घटो गंधवानित्यादौ विशिष्टवैशिष्ट्यं तत्संसर्गप्रागभावादेरपि विरोधित्वात्। नातिव्याप्तिरिति वदन्तः कुचिदनन्तरूपकृत्तो
। वेदितव्यः। गंधप्रागभावस्य गंधं प्रति विरोधित्वेपि तत्संसर्गं समवायं प्रति विरोधित्वाभावेनातिव्याप्तिपरिहाराभिधानायोगात्। न
नु गंधसंसर्गं प्रति गंधप्रागभावस्य विरोधित्वं नाम न तद्विरहरूपत्वं नापि तद्व्याप्यत्वं येनोक्तदोषः स्यात्। किं नाम तद्धानप्रतिबंधक
ज्ञानविषयत्वं तथा च गंधप्रागभावस्य गंधसंसर्गप्रतिविरोधित्वेन तत्प्रतियोगित्वप्रमाविशेष्यत्वाभावस्य गंधसंसर्गे तत्त्वाभावा
न्नातिव्याप्तिरिति चेन्न। समवायेन गंधज्ञानस्यापरपदार्थनिष्ठगंधप्रागभाववत्ताज्ञानविरोधित्वेपि गंधसमवायज्ञानस्य विरोधित्वाभावा
त्। अस्तु वा कथंचित् विरोधित्वं तथापि गंधसंसर्गस्य गंधप्रागभावप्रतियोगित्वाभावेन तत्प्रतियोगित्वप्रमाविशेष्यत्वाभावोऽस्ती
ति अतिव्याप्तिरेव। न हि घटस्य घटासंतताभाववत्। तद्व्याप्यमपि विरोधी स्येतावता घटत्वभावस्यैव तद्व्याप्यस्यापि प्रतियोगी भव

राम॰
१०

तियत्तु वस्तुतस्तु इतरपदार्थसंसर्गे अपरपदार्थनिष्ठत्यंताभावप्रतियोगितावच्छेदकधर्मशून्यत्वं योग्यतेति तदपि न। इतरप
दार्थसंसर्गमात्रे अपरपदार्थनिष्ठवृत्तित्वावच्छिन्नप्रतियोगितावच्छेदक — त्वस्य सत्त्वेन प्रतियोगितावच्छेदकधर्मशून्यत्वस्य का
प्यभावात् प्रतियोगितावच्छेदकस्याप्यासत्त्वाद्वृत्तित्वविवक्षायामपि वृक्षे कपिरिति वाक्यस्यायोग्यत्वापत्तेः। कपिसंयोगस्यापर
निष्ठात्यंताभावप्रतियोगितावच्छेदकधर्मवत्त्वात् गंधप्रागभावावच्छिन्नो घटो गंधवानिति वाक्यस्य योग्यत्वापत्तेश्च। गंधसमवाय
स्यापरपदार्थनिष्ठात्यंताभावप्रतियोगितावच्छेदकधर्मशून्यत्वात् यत्तु सैषं न स्वरूपसती प्रयोजिका किंतु संशयविपर्ययप्रमासा
धारणं तज्ज्ञानं हेतुरिति तदपि न। ज्ञानस्य संशयविपर्ययप्रमाभेदभिन्नत्वात् संशयविपर्ययप्रमासाधारणत्वायोगेन संश
यविपर्ययप्रमासाधारणं तज्ज्ञानं हेतुरित्यस्यायोगात्। उक्तरूपयोग्यताज्ञानाभावेपि प्रमस्थले तद्विपरीतयोग्यताज्ञानसत्त्वा
वेपि वादिवाक्यात् शाब्दबोधदर्शनेन तस्य तत्र हेतुत्वायोगाच्च। न चायोग्यतया निश्चिताद्वादिवाक्यात् शाब्दबोधो न भवतीति वक्तुं
शक्यं। निराकरणाभावप्रसंगात् व्याप्त्यानेदूषणाभिधानायोगात्॥ ॥रुचिदत्तस्य॥ ॥विषयाबाधो योग्यता। सा चैकान्वयप्रति

अ॰न॰ग्रा॰
११

योगिन्यपरान्वयप्रतियोगिसंसर्गः। येन संबंधेन यत्र यद्व्याप्यं तेन तत्र तत्त्वमिति यावत्। तज्ज्ञानं संशयसाधारणं पर्वतो वह्निमा
न्नवेति वत्। अयं पदार्थो पदार्थसंसृष्टो न वेति संशयस्य सुलभत्वात्। तत्प्रमाचतुष्टयः संशये ष्वेककोटौ तथात्वमस्त्येवात तदभा
वस्याऽयोग्यतातन्निश्चयस्याप्रामाण्यपरोक्षकाभूत्यः प्रतिबंधकः इत्याह। सस्थूलदृष्टा॥ ॥विषयावाधो योग्यतेति योग्यतायानिरूपितत्वे
न पुनस्तन्निरूपणायस्या चेति परामर्शायोगात् विषयबाधाभावत्वेन निरूपितायाः योग्यतायाः अन्वयप्रतियोगिसंसर्गत्वानानिरूप
णायोगाच्चा यदपि तज्ज्ञानं संशयसाधारणं कारणमिति तदपि। ज्ञानत्वस्यैव संशयसाधारणत्वेनाज्ञानस्य संशयसाधारणत्वा
भावात्। यदा योग्यताप्रमा तत्भ्रमो वा तिष्ठति तदा वाक्यस्य ज्ञातज्ञापकत्वेन वैयर्थ्यप्रसंगात्। च। योग्यतासंशयस्यैव हेतुत्वम
भिमतं न विपर्ययादीनामिति चेन्न। तथासति तत्संशयो हेतुरिति वक्तव्यत्वेन न संशयसाधारणं तज्ज्ञानं कारणमिति स्वकृत्यायोगात्। प्र
त्यक्षादिना घटं जानतः घटोस्तीति वाक्याद्बोधाभावप्रसंगाच्च। यदपि तत्प्रमाचतुष्टयः। संशयेष्वेककोटौ तथात्वमस्त्येवेति तदपि
न। शाब्दप्रमायां वक्तृनिष्ठा स्यादेव जन्यज्ञान गुणत्वेन श्रोतनिष्ठः वक्तुरस्याभावात्। नतज्जन्यं ज्ञानं प्रमेति चेन्न। वक्तुरास्या

राम
११

दिकमेव गुणोऽस्तु। किं श्रोत्रनिष्ठयोग्यताभ्रमायाः गुणत्वांगीकारेण यदपि तदभाववत्त्वायोग्यताज्ञाननिश्चयश्चाप्रामाण्यशंकाशून्यः
प्रतिबंधकः इति तदपि न। अप्रामाण्यशंकाशून्यायोग्यतानिश्चयसत्त्वेपि अग्निना सिंचेदित्यादि उन्मत्तवाक्यस्य बोधहेतुत्वद
र्शनात्। कथमन्यथा तदर्थं न शंकुर्यात्। अत एवायोग्यताज्ञानं प्रतिबंधकमिति वदंतो पक्षधरमणिकारैः परास्ता इति॥ ॥
इति परोक्तयोग्यतालक्षणभंगः॥ ॥ आसत्तिश्च पदनिष्ठान्वयबोधविरोधिव्यवधानाभावः॥ ततश्चाव्यवहितान्वयवंति वेदादी
नि आसन्नत्वाद्वाक्यानीति बोध्यं॥ घंटं कं चच कमानयपुत्रकं करमिति वाक्याभासगतानि घटमानयपुत्रकेति पदानि न वाक्यं। कं
चचकमित्यादिव्यर्थाक्षरैर्व्यवहितत्वात्। द्वयं चासत्तिः स्वरूपसत्येव शाब्दधीहेतुः। देवदत्त गामभ्याजेति पदश्राविणः अन्वयबोधवि
रोधिव्यवधानाभावरूपासत्त्यनुसंधानविरहेऽप्यासन्नेभ्यः पदेभ्योऽन्वयबोधदर्शनात्। न चैवमनासन्नेभ्यः पदेभ्य आप्तभासवाक्यात्।
आसत्तिभ्रमेण शाब्दबोधो न स्यादिति वाच्यं। इष्टत्वान्न हि अन्वयावबोधविरोधिव्यवधाने सत्यपि तदभावभ्रममात्रेण शाब्दबोधः
संभवति। आहतत्वात्। अन्यथा दाहप्रतिबंधकमणिमंत्रादिसमवधानदशायां तदभावभ्रममात्रेण दाहप्रसंगो दुर्वारः स्यात्। अ

न्नोक्तं मणिकृता। आसत्तिश्चाव्यवधानेनान्वयप्रतियोग्युपस्थितिः सा च स्मृतिर्नानुभवोऽतो नान्योऽन्याश्रय इति। स स्थूलदृष्ट्या। आसत्तेः पदधर्मतया आत्मधर्मोपस्थित्यात्मकत्वाभावेनासत्तेस्तदात्मकत्वोपयोगात्। अनासन्नमप्यासत्तिभ्रमेणान्वयबोधसमर्थमेवेति स्वरूपमेवाकांक्षावदेऽभिहितत्वेन तद्विरोधाच्च। न त्वासत्तेः पदार्थोपस्थित्यात्मकत्वे तद्विरहवेलायां तद्भ्रमः संभवति येन शाब्दबोधः स्यात्। यदपि चोक्तं सा च स्मृतिर्नानुभवो ततो नान्योन्याश्रय इति तदपि न। आसत्तेरनुभवात्मकत्वेपि अन्योन्याश्रयप्रसक्त्यभावेन तत्परिहाराभिधानायोगात्। न हि अन्वयप्रतियोग्यनुभवः अन्वयानुभवजन्यः येन तस्य तद्धेतुत्वांगीकारे अन्योन्याश्रयः स्यात् पक्षधरस्तु॥ ॥ अव्यवधानेनार्थोपस्थित्यनुकूलो व्यापार आसत्तिः सा चैकपदानंतरमपरपदे तात्पर्यमुच्चारणं वा। तेन भुक्तादिवाक्ये नाव्याप्तिः। न चैवमननुगमः सामान्यतो व्यवहितपदार्थोपस्थिति अनुकूलव्यापारत्वेन जनकत्वादित्याह। तन्न। पदधर्मभूतासत्तेः वक्तृनिष्ठव्यापारात्मकताभिधानायोगात्। व्यवहितान्वयोपेतपदघटितवाक्येन योजनयाप्यन्वयबोधाभावप्रसंगाच्च। न हि तत्राव्यवधानेनान्वयप्रतियोग्युपस्थित्यनुकूलो व्यापारोऽस्ति। किं तर्हि व्यवधानेना

न्वयप्रतियोग्युपस्थित्यनुकूलत्वस्वारस्यात्तद्रूपो व्यापारोऽस्ति न च तत्रापि कर्मवाचकपदानन्तरं क्रियापदमित्यादिप्रकारेणैव वक्तुः पद
तात्पर्यं अव्यवधानेन पदार्थोपस्थित्यनुकूलो व्यापारोऽस्तीति वाच्यं। एवं सति तात्पर्यविषयीभूतक्रमस्य पठ्यमानक्रमान्यत्वेन
तदवच्छिन्नपदात्मकवाक्यस्यैव बोधकत्वं। न तु पठ्यमानक्रमावच्छिन्नवाक्यस्येत्यापातेन वेदपुराणादीनामप्रामाण्यप्रसंगात्।
तात्पर्यज्ञानस्यैवान्वयप्रतियोग्युपस्थित्यनुकूलत्वेन तात्पर्यस्यान्वयप्रतियोग्युपस्थित्यनुकूलत्वाभावाच्च। न हि तात्पर्यज्ञा
नसद्भावे तात्पर्यविलंबेन कार्यविलंबः। येन तात्पर्यमप्युपस्थित्यनुकूलो व्यापारः स्यात्। अतो व्यवहितवेदादिवाक्येन यदान्वयबो
धः तदा अव्यवधानेनार्थोपस्थित्यनुकूलयोः तात्पर्योच्चारणयोरुभयोरपि अभावेनासत्त्वभावापाताच्चास्वतंत्रवक्तुस्तात्पर्य
मस्तीति चेन्न। वर्णानित्यत्ववादिमते स्वतंत्रपुरुषप्रणीतात्तदुच्चरितवाक्ययोर्भिन्नत्वेन स्वतंत्रपुरुषप्रणीतवाक्यस्यासन्नत्वेप्य
तदुच्चरितवाक्यस्यानासन्नत्वापरिहारात्। न हि वाक्यान्तरगतया आसत्त्या वाक्यान्तरमासन्नं भवतीति अत एवाव्यवहितत्वेन प
दतात्पर्यमासत्तिरिति निरस्तं। शुकादिवाक्ये व्याप्तेः न चेश्वरतात्पर्यं तत्रास्तीति वाच्यं। ईश्वरतात्पर्यस्य ज्ञातुमशक्यत्वेन तदवधारणस

त्तिज्ञानाभावे नवा नवार्थबोधाभावप्रसंगात् । इति केचित्तु अव्यवहितपदज्ञानजन्याव्यवहितान्वयप्रतियोग्युपस्थितिरा
सत्तिः सा च ज्ञाता शाब्दधीहेतुः गिरिर्भुक्तमग्निमान्देवदत्तेनेत्यादौ यदा गिरिरग्निमानित्येवस्मृतौ पदार्थौ स्मरति । तदापि
समभिव्याहृतपदजन्यानेयं पदार्थस्मृतिः । किंत्वव्यवहितपदजन्येति व्यतिरेकनिश्चये तत्संशये च शाब्दानुभावप्रतिबंधा
त् । यत्संशयव्यतिरेकनिश्चयो यत्र प्रतिबंधकौ तन्निश्चयस्तद्धेतुरिति । व्यासेक्तरूपासत्तिनिश्चयो हेतुरित्याहुः ॥ तन्न । न चेश्वरः
सर्वज्ञो नेति वाच्यमिति पदजन्योपस्थितीनां व्यवहितपदजन्यत्वनिश्चयेपि अन्वयबोधदर्शनेनोक्तरूपासत्तिव्यतिरेकनिश्च
यस्याप्रतिबंधकत्वादिति । तस्मादन्वयबोधजनकताविरोधिव्यवधानाभाव एवासत्तिरित्युक्तलक्षणमेवास्थेयं ॥६॥ ॥इति
स्वाभिमतासत्तिलक्षणनिरूपणपूर्वकं पराभिमतासत्तिलक्षणभंगः ॥ ॥अन्ये तु अव्यवधानेनान्वयप्रतियोग्युपस्थितिरे
वासत्तिः । अन्वयप्रतियोग्युपस्थितिश्च न शब्दजन्यैवान्वयबोधांगं । द्वारमित्यादावध्याहृतेन पिधानादिनार्थेनाप्यन्वयबोधदर्श
नात् । न चात्र पिधेहीति शब्दस्यैवाध्याहारः । अर्थाध्याहारवादिनः शब्दाध्याहारं विनापि अन्वयबोधदर्शनेन शब्दाध्याहारस्यानावश्य

कत्वात्। नहि अन्वयबोधोपयुक्ताया: अन्वयप्रतियोग्युपस्थितेः स्वत एव सत्वे प्रकारांतरेणावासंभवे शब्दस्तत्वात्तेनैवार्थः
स्मर्तव्य इति क्लृप्तधर्मः। येन शब्दाध्याहारनियमः स्यात्। न च स्वार्थान्वयपरत्वाच्छब्दानां द्वारमित्यादौ अर्थाध्याहारपक्षे पिधा
नान्वयबोधकाभावादित्। पिधानाच्च यबोधो न स्यादिति तत्सिद्धये पिधेहीति शब्दोऽध्याहार्य इति वाच्यं। पिधानान्वयस्य द्वारान्व
यस्य चैकत्वेन द्वारपदेनैव तदन्वयबोधोपपत्तेः। घोषपदस्यैव लाक्षणिकतीरान्वयबोधकत्वदर्शनात् दिति वदिति चेत्। उच्य
ते। द्वारमिति पदश्रवणानंतरं जातो द्वारपिधानान्वयबोधः शब्दकरणक एव न प्रत्यक्षानुमानकरणकः स भवेयं इंद्रियार्थसंनि
कर्षाभावेन प्रत्यक्षस्य व्याप्त्यादिमल्लिंगाभावेनानुमानस्यापि करणत्वायोगात्। कुत इत्थं कृतमिति प्रश्नेऽनेनोक्तमिति अ
भिधानायोगात्। न च पिधानानुभवः द्वारशब्देनैव भवितुमर्हति। शक्तिलक्षणाद्यभावात्। ततश्च पिधानानुभवोऽस्त्येव वक्त्रभि
प्रेतः पिधेहि शब्दोऽनुसंधेयः। वक्त्रभिप्रेतशब्दानुसंधानमेवाध्याहार इति शब्दाध्याहारसिद्धिः। किंच द्वारमिति वक्तुः अन्वयबो
धांगतया पिधेहीति शब्दोऽभिमतो न वा। आद्ये न तत्परित्यागेनार्थाध्याहारो युक्तः। पिधेहीत्युच्चारणदशायामपि तस्य परित्यागप्र

अ·नं·ता·
१४
15

संगात्द्वारशब्दस्यापिपदस्मारणायायातात् नहिशाब्दबोधांगतयावक्तृविवक्षितशब्दत्वाविशेषेपिपिधेहिशब्दएवपदस्मारकः नतु
द्वारमितिशब्दमितिराज्ञामाज्ञाप्तिः। स्वामिप्रेतोद्वारशब्दः उच्चारितोनज्ञापितः। पिधेहिशब्दस्तुप्रकरणादिनाज्ञापितइतितु
वैषम्यमात्रंनद्वितीयः। शाब्दबोधजननायप्रवृत्तस्यतत्कारणशब्दानुपादनायोगात्। अकारणकमेवकार्यमभिलषतोमोह्या
पाताच्च। नचशब्दाध्याहाराक्षेपेवाक्यार्थस्यद्वारकर्मकपिधानस्यज्ञानेपिधेहिशब्दाध्याहारःज्ञानंविनापिअध्याहारेकस्यचि
देवशब्दस्याध्याहारप्रसंगः। ननुपिधेहिशब्दस्यैवाध्याहरणः अध्याहारेचवाक्यार्थज्ञानमित्यन्योन्याश्रयइतिवाच्यं। प्रकरणा
दिनालिंगेनद्वारपिधानज्ञापनायप्रवृत्तोयंदेवदत्तइतितात्पर्यज्ञानानंतरमेवप्रवर्तकशाब्दबोधसिद्धयेशब्दाध्याहारइत्यंगी
कारात्।। अन्यथाद्वारज्ञानज्ञानवानयमितिज्ञानादपिद्वारज्ञानार्थिनःप्रवृत्तिःस्यात्। यच्चोक्तंअर्थाध्याहारवादिनःशब्दाध्याहारंविने
वान्वयबोधदर्शनात्। शब्दाध्याहारेणानतिप्रयोजकइतितन्न। पिधानवाचकस्यपिधेहिशब्दस्याभावेपिधानगोचरशाब्दानुभवोभव
तीत्यस्यव्याहतत्वात्। कथंतर्हितस्यशाब्दबोधइतिचेत्। शब्दाध्याहारेणैवपरंतुअभ्यासपाटवात्। झटितिज्ञातमपि [illegible] द्वारज्ञ
श१

राम·
१४

संधानंमौद्गान्नात्तीत्येवमन्यता। तद्यथा। धूमदर्शनात्। व्याप्तिबलाद्वह्निं जानन्नमूढः अविलंबेनैवमया वह्निर्विज्ञातः
ननु व्याप्त्यादिप्रतिसंधानं समाभूदिति मन्यता। यदपि तद्धि अन्वयबोधोपपत्त्याकायाः अन्वयप्रतियोग्युपस्थितेः स्वत एव सत्वे
प्रकारान्तरेणावासंभवेशाब्दं स्मृत्वा तेनैवार्थः कस्मर्तव्य इति कुलधर्म इति तदपि नाशाब्दं विना कथंचित्स्मृतिसंभवे पि अन्व
यप्रतियोग्यनुभवाय शाब्दानुसंधानावश्यकत्वस्यास्माभिरभिहितत्वात्। न हि स्मार्यमाणो घटोन्वयेनानुभूयते। येन स्मृतेरन्यतःसि
द्धौ शाब्दाध्याहारोन स्यात्। किं तु अनुभूयमानधर्मतयैवानुभूयते एवं चान्वयतत्प्रतियोगिविषयकैकानुभवाय क्रियाकारक
पदान्यपेक्षितानि। किं च शाब्दं विना अन्वयप्रतियोगिस्मृतिर्नोपपद्यते। अन्वयप्रतियोग्यपभिन्नव्यक्तेः। प्रागननुभूतत्वेन सं
स्काराभावात्। न चैवं शब्देनाप्यभिन्नव्यक्तिस्मृतेः संभवः। इष्टत्वात्। सामान्यलक्षणाप्रत्यासत्त्यासादृश्यलक्षणासंबंधेन वा
सर्वव्यक्त्युपस्थितौ शक्तिग्रहस्य जातत्वात्। तद्बलेन शाब्दश्राविणः सामान्यत एवान्वयप्रतियोगिस्मृतिः न च विशिष्टाभिन्नव
व्यक्तेरेव स्मृतिरिति स्वंगीरात्। अत एव विधानान्वयस्य द्वारान्वयस्यचैकत्वात्। द्वारपदेनैव तदन्वयबोधोपपत्तेः। पिधेहि शाद्वा

ध्याहारार्थइत्यपिपरास्तं।पिधानानुभवसामग्रीत्वेनपिधेहिशब्दानुसंधानवद्व्याप्यकत्वात्।यदपिघोषस्यैवलाक्ष
णिकत्वेनान्वयबोधकत्वमितितदपिनलाक्ष।णिकस्याप्यनुभावकत्वेनघोषपदस्यैवतस्यप्रयोगात्।नतुद्वारमित्यादौ
पद्यत्तुच्चारितमपिपिधेहीतिपदमस्तीत्यभ्युपगम्यते।तर्हिद्वारपदमवक्तिमर्थमुच्चारयतिनपुनःपिधेहिपदंनचविना
विनिगमकवैषम्यमुक्तं।ततोनास्त्येवद्वारमित्यत्रपिधेहिपदमितिचेदुच्यतेअनुसंहितमेववक्तुःशाब्दबोधांगत्वमा
द्वारपदमिवपिधेहिपदमपिकिंनामद्वारपदमेवकर्मबोधकमस्तु।।नतत्पर्यायपदंपिधानरूपक्रियोपस्थापकंतुपिधे
हिपदंवातत्पर्यायपदंवास्त्वितिसामान्यतएवानुसंहितं।इममेवविशेषमवलंब्यवक्ताद्वारपदमुच्चारयतिक्रियावाचकस्या
भिप्रेतपदसामान्यंप्रकरणादिनःविज्ञापयति।अतएवकेचित्पिधेहीत्यध्याहरंति।अपरेपुनराच्छादयेतिउक्तंचाध्याहारस्यले
अध्याह्रीयमाणायास्मानुसंहिततयासत्वंयज्ञानवशतोन्यत्रपदंतत्रप्रतिष्ठितं।वाक्यंवेतिसतांनीतिः।साचकाशेनतद्भवेदिति
।। ।।उक्तंचसूत्रकृता।।शब्दाध्याहारः।व्यतिहारोविशिंषंतिहीतरवदितिउक्तंचभाष्यकृता।अध्याह्रीयमाणस्यस्वार्थान्व

मेकपदलक्षणायामितरपदवैयर्थ्यंइतरपदमहिम्नैव विशेषस्य लक्षणीयत्वादिति अत्र वक्तव्यं किमस्तुवेत्यनेन चित्राप
दएवलक्षणा न गोपद इति पक्षोंगीक्रियते। उत चित्रपदे गोपदे चेत्युभयत्रापि लक्षणेति पक्षोंगीक्रियते। नाद्यः चित्रापदेपि
त्पपि शाब्दवैयर्थ्यप्रसंगात्। गोपदेन समासाभावप्रसंगाच्च। अनेकयोः सुबंतयोरन्यपदार्थे तन्यस्य समासप्रयोजकस्या

अन.ता०
१०२
102

भावात्। त्वन्मते चित्रापदस्य गुणवाचित्वात्। मुख्यार्थसंबंधाभावे लक्षणायोगाच्च। परगोपदस्योपसर्जनाभावेन गोस्त्रियोरुप
सर्जनस्येत्यस्य ह्रस्वत्वाभावप्रसंगाच्चानापि द्वितीयः इतरपदमहिम्ने अविशेषस्य लक्षणीयत्वात् इत्यनंतरग्रंथविरोधात्। नहि
पदद्वयलक्षणाभावे समासः संभवति॥ येतरपदवैयर्थ्यपरिहाय इतरपदमहिम्ना अपरपदस्य विशेषलक्षकत्वाभिधानम
र्थवत्स्यात्॥ ॥अत्राहरुचिदत्तः॥ ॥अस्तु वैयर्थ्यप्रमवादः। वस्तुतः साक्षात्संबंधेनोपस्थापकत्वाद्गोपदएव लक्षणा॥
अतएव न चैवमित्यादिग्रंथः। गोपदलक्षणादूषणपरिहारार्थः प्रवृत्त इति तन्न। बहुव्रीहौ चित्रगोपदयोरन्वयबोधानंतरं गोप
दं स्वज्ञाप्यचित्रगोस्वामिलक्षकमिति प्रागेव गोपदलक्षणापक्षे चित्रापदवैयर्थ्यस्य परिहृतत्वात्। अन्यथा पूर्वग्रंथवैयर्थ्यं स्यात्
प्रयोजनांतराभावात्। न चैवमिति एवं शब्दप्रयोगात्। अस्तु वेति प्रागुक्तपक्ष एव वैयर्थ्यशंकानिरासार्थकत्वस्य प्रतीयमान
त्वेन गोपदलक्षणापक्षे दूषणपरिहारतया ग्रंथयोजनायोगाच्च। पदपिन तु बहुव्रीहावन्यपदार्थस्य लक्ष्यत्वे नियमतो लक्ष
णीयपदलिंगत्वं न स्यात्। लाक्षणिकस्य पदस्य लक्षणीयपदलिंगाग्राहकत्वनियमात् स्वलिंगापरित्यागाच्च। अतोऽन्यपदार्थे

राम०
१०२

शक्तिरेवेति चेत्॥ ॥अत्र ब्रूमः॥ ॥बहुव्रीहेर्लाक्षणिकत्वेन विशेषणपदत्वनियमात्। नियमश्च लक्षणीयविशेष्यपदलिं
गत्वं सामानाधिकरण्यात्। समानविभक्तिकस्य विशेषणपदस्य विशेष्यपदलिंगकपदत्वनियमादिति॥ ॥तत्र शंका तावद
युक्ता। लक्षकगोपदस्य लक्षणीयपदलिंगत्वाभावेन लक्षणीयपदलिंगत्वेन स्त्रीत्वापादनायोगात्। न हि गोपदं लक्षणीय
पदात् लिंगकं येनेदमापादनं युक्तं स्यात्। किं तु बहुव्रीहिप्रातिपदिकं नापि तत्त्वापादकमस्ति। बहुव्रीहिप्रातिपदिकस्य लक्षक
त्वानंगीकारात्। अत एव लक्षणीयपदलिंगग्राहकत्वनियमात्स्वलिंगापरित्यागाच्चेति हेतुद्वयमसंगतं बहुव्रीहिप्रातिपदिक
स्य लाक्षणिकत्वेन लाक्षणिकस्वभावकथनस्योपयोगादर्शनात्। समाधानमप्यनुपपन्नं। बहुव्रीहेर्लाक्षणिकत्वाभावेनास्ति हि
न तेन विशेषणपदत्वसाधनायोगात्। अवयववृत्तेनालाक्षणिकत्वेनावयविनः विशेषणपदत्वं साध्यत इति चेत्। न तत्पुरु
षे व्यभिचारेण व्याप्त्यभावात्। राजपुरुष इत्यादौ पूर्वपदे लक्षणया षष्ठ्यर्थलक्षणांगीकारात्। यदपि दंड्यादिवाक्यस्याशक्तस्य पुरु
षादिविशेष्यलिंगकत्वादिति॥ ॥तदपि न। दंडीत्यस्यैकपदत्वेन पदसमुदायत्वरूपवाक्यत्वाभावात्॥ ॥इति बहुव्रीहौ मतप्युक्तं।

स्यपदलक्षणानियमभंगः ॥ ॥ राजपुरुष इत्यादितत्पुरुषे न पूर्वपदस्य षष्ठ्यर्थलक्षणा। औपगवशब्दादिव राजपुरुषशब्दादपि
योगेनैव षष्ठ्यर्थभानसंभवादिति योगवृत्तेः खल्वयं महिमा यत् एकावयवार्थसंबंधितेनापरावयवार्थधीहेतुत्वं। अन्यथोपग
वइत्यत्रोपगवित्वस्य तत्संबंधिनि लक्षणा स्यात्। एवं पंकजशब्दे पि पंकपदस्य तत्समर्थलक्षणा स्यात्। न चेष्टापत्तिः यौगिकत्वाभा
वप्रसंगात्। न चावयववृत्त्याबोधकत्वात् यौगिकत्वमिति वाच्यं। अवयववृत्तिमपेक्ष्य बोधकस्य यौगिकत्वात्। अन्यथा यो
गवृत्तेर्मुख्यवृत्तित्वं न स्यात्। न च द्विरेफमुखवृत्तिमित्वस्य यौगिकत्वं न स्यात्। पूर्वावयवस्य द्विरेफपदस्य भ्रमरे लाक्षणिकत्वात् इति
वाच्यं॥ मार्गेश्चलं तिमंचाः क्रोशंतीत्यादि प्रयोगस्थ मंचादिशब्दानां रूढाभासत्ववत्। द्विरेफमुखशब्दस्य यौगिककाभासत्वेन यौ
गित्वाभावात्। एवं राज्ञः पुरुष इति वाक्ये पि राज्ञ इति षष्ठ्यंतपदस्य राजसंबंधिनि लक्षणा स्यात्। न च राज्ञि संख्यावद्बोधार्थबोधा
र्थमेव राजप्रातिपादिकस्य विभक्त्यर्थे लक्षणा शब्दानुसंधानस्यैव बोधहेतुत्वेनानुसंहितत्वमविशिष्टस्यैव बोध संभवे लक्षणाक
ल्पनायोगात्। अन्यथा वाक्यांतिमपदस्यैव वाक्यार्थलक्षकत्वं स्यात्। तन्मते अंतिमपदश्रवणकाले पूर्वपदानां विनष्टत्वेन बोधक

स्वाभावात्। अथ तत्रानुसंहितानामेव पदानां बोधकत्वान्न लक्षणा। हंत तर्हि इहापि अनुसंहितविभक्तेरेव बोधकत्वान्न लक्षणेत्य
स्तु एवं ग्रामगतः इत्यादित्वप्रकृतेऽपि पूर्वपदस्येव कर्मादिगतसंख्यायां न लक्षणा। अनुसंहितविभक्तिभिरेव तद्बोधसंभवात्। न च लुप्त
विभक्त्यनुसंधाननियमाभावाल्लक्षणैवांगीकर्तव्येति युक्तं। विभक्त्यनुसंधानाभावदशायां ग्रामगतइत्यादौ कर्मगतसंख्यातात्प
र्यस्य ज्ञातुमशक्यत्वेन लक्षणाया अपि स्वीकर्तुमशक्यत्वात्। न हि राजपुरुषः ग्रामगतः शंकुलाखंडः इत्यादिसमासपदेष्वप्युत्तरस्य
राजपुरुष इत्यादिविग्रहबोध्येष्वर्थेषु तात्पर्यं भवति येनानुसंहितविभक्तेर्बोधकत्वमपहाय लक्षणास्वीकारो युक्तः स्यात्। न च स्मृ
तविभक्तेर्बोधकत्वे समासस्य विग्रहस्मारकत्वेनैवोपयोगः स्यात् ननु बोधकत्वमिति वाच्यं। स्मृतविभक्तिसहकारेण समस्यमान
पदानामेव बोधकत्वसंभवे स्मृतविग्रहवाक्यस्यैव बोधकत्वमिति कल्पनायोगात्। अन्यथा स्मृतविभक्तिसहकारेण दधिपश्येति
वाक्यस्थ दधिशब्दस्य बोधकत्वं न स्यात् न च क्रियाकर्मभावेनान्वयबोधे द्वितीयांतपदजन्यपदार्थोपस्थितेर्हेतुत्वस्य घटः कर्मत्वमा
नयनमित्यत्रान्वयबोधनिरासायांगीकर्तव्यतात् तत्र विभक्तिस्मरणमावश्यकं न समासे इति वाच्यं। राजा संबंधः पुरुष इत्यत्रान्वय

बोधनिरासाय स्वत्वाभिमावादिनान्वयबोधे विभक्त्यंतशब्दजन्यपदार्थोपस्थितेरावश्यकत्वात्। भाषाशब्देष्वपि घटादिशब्दप्र
तिनिधेरिव विभक्तिप्रतिनिधेरपि सद्भावात् न विभक्तिं विनान्वयबोधः न च घटो नास्तीत्यत्रापि स्यात् ताहशस्यैव बोधिकेति प्राप्तं बो
ध्यमानाभावस्य घटसंबंधित्वेन प्रतियोग्यनुयोगिभावेनान्वयस्यावक्तव्यत्वात्। इति वाच्यं घटो नास्तीत्यत्राभावनिष्ठसत्तायोगित्वे
न घट एव प्रतीयते। नत्रघटस्याभाववद्यत्वेन वा घटप्रतियोगिकाभावः सत्तायोगित्वेन प्रातीयत इत्यंगीकारात्। वक्ष्यते चैतन्न
र्थवादे॥ उक्तं च प्रधानकृता तत्पुरुषस्य यौगिकत्वं तत्र प्रवृत्तिनिमित्तापेक्षा हि निर्योगः॥ यथोक्तं भकारः श्रीयुगवः राजपुरुष इ
ति एवं उपकुंभार्धपिप्पलीत्यादि तत्पुरुषोपि यौगिक एव॥ इयांस्तु विशेषः। राजपुरुष इत्यादि: उत्तरपदार्थप्राधान्येन बोधयति
।उपकुंभमित्यादिस्तु पूर्वपदार्थप्राधान्ये न बोधयतीति॥ ॥इति तत्पुरुषस्य यौगिकत्वसमर्थनं॥ ॥मणिकारस्तु मन्यते। त
त्पुरुषे राजपुरुष इत्यादौ पूर्वपदस्य घस्यार्थसंबंधे निरूढलक्षणायैव राजसंबंधिपुरुषबुध्युपपत्तेर्न समासे शक्तिः अनन्यल
भ्यस्य शब्दार्थत्वात्। नन्वनुपपत्तिं विना कथं घस्यार्थलक्षणेति चेत्। यदि षष्ठ्यर्थेन लक्ष्येत। तदा राजपुरुषादौ लाघवादिना

ष्ठिति सामानाधिकरण्यावगमात् । राजत्वविशिष्टपुरुषत्वस्यैकविभक्तिकोन्वयबोधः स्यात् राजवाहनमानयेत्यादौ वा
हनपदे वाहनवल्लक्षणा स्यात् । अथ राजत्वविशिष्टेनास्मदाद्यानयनान्वयो अयोग्य इति चेत् । तर्हि नयैवानुपपत्त्या तात्पर्यानु
पपत्त्या वा षष्ठ्यर्थलक्षणा विभक्त्यर्थापेक्षो हि सर्वत्र नामान्वयः । अतः कृतविभक्त्यर्थासंभवात् । विभक्त्यर्थलक्षणैवोचिता । ननु
विभाषेति सूत्रेण वा । वाक्यसमासयोस्तुल्यार्थतादर्शिना । वाक्ये च मुख्या वृत्तिः अतः समासेपि सैव वृत्तिः । अन्यथा तुल्यार्थतापत्तेः
। वाचकस्यैवानुशासनाच्च । यथा लिङादेः अन्यथा गाव्यादेरप्यनुशासनापत्तेरिति चेन्न । उच्यते साधुशब्दस्यानुशासनं व्याकरणं
स्य साधुत्वज्ञापकत्वेनैव प्रामाणिकप्रसिद्धिसिद्धत्वात् । अत एव न गव्यादीनामनुशासनं भवति च समासः साधुः अतो युक्तं त
स्य साधुत्वानुशासनं । साधुत्वं च लाक्षणिकपदेपि संभवति पदवाचकता चार्थान्यलभ्यत्वादवगम्यते । ननु वाचकत्वानु
शासनं व्याकरणं अवाचकानामपि टाप्ङीबादीनां अनु । [illegible] शिष्टत्वादिति ॥ ॥ पूर्वपदस्य लक्षणां विना
लुप्तषष्ठीस्मरणसहकृतपूर्वपदसहकृतोत्तरपदेनैव राजकीयः पुरुष इति बुद्धिसंभवे पूर्वपदस्य लक्षणाभिधानायो

गात्। किंच विभक्त्यर्थस्य नामार्थत्वे भेदेनान्वये विभक्त्यंतरापेक्षा स्यात्। नामार्थयोर्भेदेनान्वयस्य विभक्त्यर्थसापेक्षत्वात्। सुपां सुलुक्पूर्वसवर्णाछेयाडाड्यायाजालः इत्यत्र सुब्वाचकपदात् षष्ठीदर्शनात्। किंच षष्ठ्यर्थलक्षकाद्राजपदात् विभक्त्याभावे राजपुरुष इति समासो न स्यात्। सुप्सुपेति सुबंतयोरेव समासानुशासनात्। भावे च लक्षणायोगः। दधिपश्येत्यादाविव लुप्तविभक्तेरेव बोधकत्वसंभवात्। किंच सुपो धातुप्रातिपदिकयोरिति समासावयवसुपो लुग्विधानमप्युक्तं स्यात्। वाचकमपहाय लक्षकपदाश्रयणायोगात्। शब्दगौरवादपि प्रतिपत्तिगौरवस्य जघन्यत्वात्। अन्यथाव्याप्तेपि विभक्तिलोपं विदध्यात्। एतेन राजपुरुष इति तत्पुरुषे पूर्वपदस्य न संबंधिनि लक्षणा। अपि तु राजसंबंधे तयोश्च धर्मधर्मिभावेनान्वयः। अन्वयप्रतियोगि राजसंबंधोपस्थित्यर्थं राजपदे लक्षणेति रुचिदत्तोक्तं निरस्तं॥ राज्ञः पुरुष इति व्यासे राजपुरुषयोरेवान्वयभावेन समासेपि राजपुरुषयोरेवान्वयभानस्याभ्युपगंतव्यत्वात्॥ ॥पक्षधरस्तु॥ ॥राजपुरुष इत्यत्र पूर्वपदस्य राजसंबंधिन्येव लक्षणा राजपुरुष इति समासश्रवणे राजसंबंधी पुरुष इति अनुभवस्य जायमानत्वात्। न च तथानुभवे का

णाभावः। विरुद्धविभक्त्यानवरुद्धयोः प्रातिपदिकयोरेवतद्धेतुत्वात्। अतएवनीलोत्पलमित्यादिनाऽभेदबोधः। नचदेव
दत्तस्यपत्न्याधनमित्यत्रापिदेवदत्तपत्न्योरभेदान्वयबोधः स्यादितिवाच्यं व्यधिकरणषष्ठ्यर्थोविभक्त्यावरुद्धत्वेनविभक्त्यानच
रुद्धप्रातिपदिकाभावादित्याह॥ ॥तन्न॥ ॥राज्ञःपुरुषइतिविग्रहस्यसमासार्थविबोधकत्वाभावप्रसंगात्नविरुद्धाविभक्त्य
रुद्धस्यतत्स्याभेदान्वयबोधकत्वाभात्किंचराजपुरुषइत्यादौकर्मधारयएवस्यात्। ननुषष्ठीतत्पुरुषःकर्मधारयार्थाभेदबो
धकस्यकर्मधारयत्वोचित्यात्। तथाषष्ठीसमासविधायकंषष्ठीतिसूत्रमनर्थकंस्यात्। यदत्रोक्तंनचराजपदादेःसंबंधिपरत्वे
कर्मधारयापत्तिरितिवाच्यं। समासात्पूर्वंराजपदस्यसंबंधिपरत्वाभावादितितन्न॥ ॥पूर्वंराजसंबंधिपरत्वाभावेपश्चादपि
संबंधिपरत्वानुपपत्तेः। समासार्थतात्पर्यशून्ययोःपदयोःसमासानुपपत्तेरसमर्थयोरेवसुवंतयोःसमासविधानात्। यत्तुरा
जपुरुषइत्यनेनराजसंबंधीपुरुषइतिबोधोभवतीति॥ ॥तन्न॥ आदौराजपुरुषयोःसंबंधबोधस्यैवजायमानत्वात्राजसंबंधीपु
रुषइतिबोधस्तु अयंमस्यपुत्रइतिशाब्दश्रवणानंतरं अयमस्यपितेतिजायमानबोधवत्मानसः। यत्तुविभक्त्यानवरुद्धयोःप्रातिप

अन॰ ता॰
१०६
106

दिकयोरभेद एवान्वयबोधे सामर्थ्यमिति तत्र॥ ॥विरुद्धविभक्त्यनवरुद्धत्वापेक्षया लाघवेन समानविभक्त्या विरुद्धत्वस्यैवाभेदान्वयबो-
धे तंत्रत्वात्। न चैवं देवदत्तस्य पश्य स्वस्तिमित्यत्राभेदान्वयबोधापत्तिः॥ स्त्रीपुंसयोर्भेद इति भेदानुसंधानप्रतिरुद्धत्वात्। तदनुसंधाना-
भावे चाभेदबोधस्त्विष्ट एव। अत एव देवदत्तस्य जामातुः फलमित्यत्राप्यधिकरणषष्ठ्यंतपदाभ्यामभेदस्य बोधो भवति। न च समानविभ-
क्तिकत्वाभावात्। नीलोत्पलमित्यत्राभेदान्वयबोधानुपपत्तिः। तत्रापि लुप्तविभक्तेरनुसंधानवशेन बोधसहकारित्वाभ्युपगमात्।
अपि च राजसंबंधपुरुषः इत्येतेनापि पुरुषे राजसंबंधान्वयधीः स्यात्। अन्वयप्रतियोग्युपस्थापकसत्त्वात्। अपि च यदि तत्पुरु-
षे पूर्वपदे लक्षणां विना न बोधः तर्हि हि तद्धितसमासाद्येति सुश्लोपं न विदध्यात्। स्थितमपि वाचकशब्दं विहाय लक्षणादरणा-
योगात्। शाब्दलाघवादपि प्रतिपत्तिगौरवस्य जघन्यत्वात्। अन्यथा व्यासेऽपि विभक्तिलोपं विदध्यात्। यदपि अनुपपत्तिं विना कथं ष-
ष्ठ्यर्थलक्षणोत्थाशंका यदि षष्ठ्यर्थे न लक्ष्येत तदा राजपुरुष इत्यादौ लाघवादिनाश्माडिति सामानाधिकरण्यावगमात्। राजत्वविशि-
ष्टपुरुषस्यैकविभक्तिकोऽन्वयः स्यात्। राजवाहनमानयेत्यादौ राजवाहनपदे वावाहनवल्लक्षणा स्यादिति समाधानं तदपि न॥ ॥

राम
१०६

बोध
ना

लुप्तस्मृतषष्ठ्यर्थस्यैवज्ञातत्वेनसामानाधिकरण्येनान्वयबोधनिर्वाहस्योपपत्तेस्तदर्थलक्षणकल्पनायोगात्। यत्तु अथ राजत्वविशि
ष्टेनास्मदाद्यानयनान्वयोऽ[illegible]योग्य इति चेत्। तर्ह्यनयैवानुपपत्त्या तात्पर्यानुपपत्त्या षष्ठ्यर्थलक्षणेति। तदपि न॥ ॥संबंधल
क्षणायाः राजत्वविशिष्टस्यास्मदाद्यानयनानुपपादकत्वेन अनयैवानुपपत्त्या संबंधलक्षणास्वीकारायोगात्। लुप्तषष्ठ्यैव राजसंबं
धोपस्थित्या तात्पर्योपपत्तौ तदर्थराजपदस्य षष्ठ्यर्थलक्षणांगीकारायोगाच्च। यदपि साधुत्वानुशासनं व्याकरणं भवति च समासः सा
धुः। अतो व्युत्पन्नं। तस्य साधुत्वानुशासनं साधुता च लाक्षणिकपदेपि संभवतीति॥ तदपि न॥ साधुतयानुशिष्टस्य समासपदस्य लाक्षणि
कत्वाभावेन साधुता च लाक्षणिकपदेपीत्युक्तेरसंगतत्वात्॥ ॥इति तत्पुरुषे मत्प्रयुक्तपूर्वपदलक्षणाभंगः॥ ॥एवं नीलोत्पल
मित्यादिकर्मधारयेपि लुप्तसमस्तविभक्तिसहकृतपदाभ्यामेवाभेदान्वयबोधसंभवात्। षष्ठीतत्पुरुषवद्योग एवाङ्गीयां तु विशेषः
॥ ॥अभ्यासपाटवात् प्रथमं नामार्थयोरभेदो बोध्यते। तदसंभवे च स्वस्वामिभावकार्यकारणभावादिलक्षणान्वयो बोध्यते। तत्र
शीघ्रोपस्थितिकत्वात्कर्मधारयो बलवान्। यथा अस्या दिशाह्वानां इद्दिपादिपुरुदिसाम्येपि अभ्यासपाटवाच्छीघ्रोपस्थितिहेतुत्वेन

इंद्रियेषु रूढिर्वर्तती। षष्ठीतत्पुरुषार्थभेदान्वयस्तु अभेदान्वयबोधोत्तरं प्रतीयत इति षष्ठीतत्पुरुषः यौगिकोपि ततो दुर्वलः॥
॥ ॥तद्यथा। अक्षशद्स्य शकरावयववाचो रूढिः रूढित्वेपि इंद्रियरूढितो दुर्वला। बहुव्रीहिस्तु लाक्षणिकत्वात्ततो दुर्वलः॥ ॥
इति स्वमते षष्ठ्यादितत्पुरुषात् कर्मधारयस्य विशेषसमर्थनं॥ ॥मणिकारस्तु॥ ॥नीलोत्पलमित्यादौ कर्मधारये विभक्तिं वि
नैव नामार्थयोरन्वयबोधानंतरं विशिष्टस्य कर्मत्वेन क्रियान्वयः कर्मधारयेण शक्तिर्न वा लक्षणा। तां विनापि विशिष्टान्वय
बोधोपपत्तेः। ननु नीलघटयोः सामानाधिकरण्यप्रतीतेस्तत्र लक्षणैव अन्वयप्रकारकत्वादिना च तस्य भाने राजपुरुषादौ षष्ठ्य
र्थोपस्थितिरपि तथास्तु अत्र ब्रूमः। कर्मधारये सामानाधिकरण्यं नामार्थयोरन्वयो भेदो वा गुणगुणिनोः समवायो वा अनुभूयते
सत्तान्वय एनान्वयप्रतियोगि अतोन्वयप्रतियोगिनो रूपस्थितिर्नामपदादेवेति न तदर्थं लक्षणा राजपुरुषइत्यत्र तु राजसंवं
धिपुरुषयोरन्वयोनुभूयते। राजसंवंधिन अन्वयप्रतियोगिन उपस्थितिर्न राजपदे षष्ठ्यर्थलक्षणां विना राज्ञः पुरुषं राजसंवंधिनं
पुरुषं राजपुरुषमानयेत्यादौ पर्यायत्वात्। राजसंवंधिनः पुरुषान्वयो भासते। राजसंवंधी तु अन्वयप्रतियोगित्वेन एवं च बहुव्री

हौ सर्वत्रां सपदानां षष्ठीतत्पुरुषे पूर्वस्यान्यपरतमा लक्षणिकत्वात्। तन्मध्ये कर्मधारयो बलवान् तत्र सर्वेषां पदानां स्वार्थपर
तया मुख्यत्वादित्याह॥ ॥तन्न॥ ॥कृष्णां गामानय नीलमुत्पलमानयेत्यादौ विशेषणपदस्य विभक्तिशून्यत्वेन तादात्म्येनान्वय
बोधाभावस्य कृष्णां गामानय नीलमुत्पलमानयेत्यादौ विभक्तिसमभिव्याहारवशात्। तादात्म्येनान्वबोधस्य दर्शने नभेदेनान्वयबो
धवत्। अभेदान्वयबोधस्यापि विवक्षितविभक्तिसापेक्षत्वे न विभक्तिं विनान्वयबोधायोग्यता। न तु विशेषणविभक्तिः साधुत्वार्था। द्वि
तीयादिविभक्तेः कर्मत्वाद्यर्थस्य प्रमितत्वात्। विशेषणे च विशेष्यकर्मत्वादीनां अभावात् विशेषणावच्छिन्नविशेष्यस्यैवानयनादि
क्रियाकर्मत्वात्। न च विशेषणविभक्तेरभेदार्थकत्वं वक्तुं युक्तं। तदर्थकत्वे मानाभावात्। नीलोत्पलमित्यादौ विशेषणविशेष्ययो
रभेदस्य संसर्गीभूय भासमानत्वेनानन्यलभ्यताभावाच्च। अन्यथा नीलाभिन्नस्यान्वयप्रतियोगित्वे न नीलाभिन्नाभिन्नमुत्पलमिति
प्रतीतिप्रसंग इति चेन्न। विशेषणपदार्थस्यापि विशेष्यवत् कर्मादिरूपत्वेन तद्विभक्तेरपि कर्माद्यर्थकत्वानपायात्। विशेषणपद
स्य विशेषणावच्छिन्नधर्मिवाचित्वात्। धर्मिणश्च विशेष्याभिन्नत्वात्। न हि तदेव कर्मादिरूपमतद्रूपं चेति संभवति। विशेषणपदस्य वि

शेषणावच्छिन्नधर्मिवाचकत्वाभावे अभेदान्वयबोध एव न स्यात्। स्याच्च दण्डः पुरुष इति प्रयोगे इव दण्डी पुरुष इति प्रयोगे इवाभेद
बोधः। न च विशेष्यविभक्त्यैव कर्मत्वादेर्बोधितत्वात् विशेषणविभक्तिवैयर्थ्यं विशेषणविशेष्यपदार्थयोरभेदबोधनाय कर्म
त्वादेर्बोधनीयत्वात्। अन्यथा कर्मत्वावच्छिन्ने न कर्मत्वशून्यस्य नाभेद इति बुद्धिः स्यात्। भावाभावयोर्विरुद्धधर्मत्वात्। अभेदबोध
नाय हि एकधर्मावच्छिन्नतया पदार्थौ प्रतिपादयति भेदबोधनाय च विरुद्धधर्माधिकरणतयेति सुप्रसिद्धं। किं च विशेषणविभक्तेः साधु
त्वार्थकत्वे विशेषणात् द्वितीयादिर्न स्यात्। कर्मणि द्वितीयेत्यादिना कर्माद्यर्थ एव द्वितीयादेरनुशासनात्। न च विशेषणविशेष्य
विभक्त्योः कर्माद्यर्थकत्वे कर्मत्वादेर्बोधप्रसंगः। इन्द्रियार्थसन्निकर्षे च सोः संभूयैकप्रतीतिजनकत्ववत्। विशेषणविशेष्यविभक्त्योः
संभूय कर्मत्वादिविषयकप्रतीतिजनकत्वांगीकारात्। नापि नीलमुत्पलमानयेत्युक्ते पृथगन्वयधीप्रसंगो बाधकः। एकविभक्त्य
वरुद्धानां पदानां बाधकाभावे अभेदान्वयबोधजनकत्वस्य व्युत्पत्तिसिद्धत्वात्। पृथगन्वयतात्पर्यविज्ञाने च पृथगन्वयबोधस्येष्ट
त्वात्। न च खड्गमालेत्यादौ स्त्रीत्वाद्यर्थविहितानां टाबादीनामर्थाभावे प्रसक्तिवत् विशेषणपदात् कर्मत्वादिविहितद्वितीयादिवि

भक्तिप्राप्तिरिति वाच्यं त्तिं नानुशासनैतेषां सावाद्यं तानामेवानुविशिष्टत्वेन तदन्यथानुपपत्त्यैव तावादिप्राप्तिः इह च तदभावात्॥ तदु
क्तं नीलोत्पलाभेदस्य संसर्गीभूय भासमानत्वात्। नाभेदो विशेषणविभक्त्यर्थ इति तदिष्टमेवाविशेषणविभक्तेरपि कर्मतान्यर्थत्वा
त्। अभेदस्य सामानाधिकरण्यपदबललभ्यत्वांगीकारात्। अत एव नीलाभिन्नाभिन्नमिति बोधप्रसंग इति दूषणं परास्तं। अभेद
स्य संसर्गीभूय भासमानत्वेनान्वयप्रतियोगिप्रकारतयाभानानंगीकारात्। यत्तु कर्मधारये न शक्तिर्न वा लक्षणा नाम्नां विनापि आ
नायनादिप्रतियोगियोगिनो विशिष्टस्य बोधोपपत्तेरिति तन्न। अन्वयप्रतियोगिनो विशिष्टस्य बोधायैव योगस्य वक्तव्यत्वात्। अ
न्यथा मंडपशाटकस्यापि मंडपानकर्तृरियोगो न स्यात्। पददिकर्मधारये प्रतीयमानं सामानाधिकरण्यं नामार्थयोरभेदो वा गुणगुणि
नोः समवायो वा। स चान्वय एव नान्वयप्रतियोगी अतोन्वयप्रतियोगिनो रूपस्थितिर्नामपदाच्छक्त्यैवेति न तदर्थलक्षणा। राजपु
रुष इत्यत्र तु राजसंबंधिपुरुषयोरन्वयोनुभूयते। राजसंबंधिनश्चान्वयप्रतियोगिन उपस्थितिर्न राजपदे षष्ठ्यर्थलक्षणां विना।
राज्ञः पुरुषं राजसंबंधिनं पुरुषं। राजपुरुषमानयेत्यादौ पर्यायत्वात्। राजसंबंधिनः पुरुषान्वयो भासत इति राजसंबंधीत्वन्वयप्रतियो

गित्वेनेति वैषम्योपपादनं। न तदपि न राज एवान्वयप्रतियोगित्वेन राजसंबंधिनो ऽन्वयप्रतियोगित्वाभावात्। राजसंबंधस्यैव
षष्ठ्यर्थत्वात्। राजसंबंधिनः षष्ठ्यर्थत्वाभावेनान्वयप्रतियोग्युपस्थितेस्तदर्थे षष्ठ्यर्थलक्षणांगीकारायोगाच्च। राजपुरुषं राजसं
बंधिनं पुरुषं इत्यनयोः समानार्थत्वाभावेपि राजपुरुषयोरन्वयबोधानंतरं मनसा नियमेन राजसंबंधी पुरुष इति बोधस्य जाय
मानत्वेनैव पर्यायत्वस्योपपन्नत्वेन तदन्यथानुपपत्यापि राजपुरुषमित्यत्र राजसंबंधिनः पुरुषान्वयप्रतियोगित्वस्य वक्तुमशं
क्यत्वात्। यत्तु कर्मधारये प्रतीयमानसामानाधिकरण्यं नामार्थयोरभेदो वा गुणगुणिनोः समवायेति तदपि नासत्समवायस्य सा
मानाधिकरण्यरूपत्वाभावेन गुणगुणिनोः समवायप्रतीतेः सामानाधिकरण्यप्रतीतित्वोपपादनायोगात्। अन्यथा घटे रूपमि
ति तत्स्वरूपाज्ञायमानापि प्रतीतिः सामानाधिकरण्यप्रतीतिः स्यात्। तन्मते नीलोत्पलमित्यत्र नीलनामार्थस्य गुणत्वेनाभेदान्वय
तयाभासत्त्वादसमभिधानायोगाच्च। अभेदोपचारस्तत्रांगीक्रियत इति चेन्न। उपचारस्य व्यवहारमात्रत्वेनं तेनाभेदप्रतीतिसमभिधानायो
गात्। नहि सिंहो माणवकः अग्निर्माणवक इत्यभेदोपचारेणाभेदं प्रतीयंति। येनात्रोपचारेणाभेदप्रतीतिः स्यात्। किं तु सादृश्यमा

त्रं प्रतीयंते। अत एव बहुव्रीहौ सर्वेषां सपदानां षष्ठीतत्पुरुषे पूर्वपदस्यान्यतरयोर्लाक्षणिकत्वात्ताभ्यां कर्मधारयो बलवान्। इत्येत
दपि निरस्तं। बहुव्रीहौ पदद्वयस्य लाक्षणिकत्वेन उत्तरपदमात्रलक्षणाविधानस्यायुक्तत्वात्। षष्ठीतत्पुरुषे च स्वरतः षष्ठीविभक्ते
रेव बोधकत्वेन पूर्वपदलक्षणाभावात्॥ ॥इति तत्पुरुषकर्मधारयोर्मयुक्तवैषम्यभंगः॥ एव अर्धपिप्पली। अर्धकोषातकीत्या
दितत्पुरुषेपि योग एव। पिप्पल्या अर्धं मित्यस्यावयवशक्तिलभ्यत्वात्॥ इयांस्तु विशेषः॥ राजपुरुष इत्यादितत्पुरुषोत्तरपदार्थ
प्रधानः। अर्धपिप्पलीत्यादितत्पुरुषस्तु पूर्वपदार्थप्रधानः। तथानुभवात्। अतिखट्वः अतिमाल इत्यादितत्पुरुषेपि पूर्वपदार्थप्र
धानो योग एव। तेन खट्वां अतिक्रान्त इत्याद्यर्थप्रतीतेः। अत्याद्युपसर्गाणां अतिक्रान्ताद्यर्थत्वं उपसर्गवादे वक्ष्यते। एवमधिकु
मारि उपकुंभं समुद्र इत्याद्यव्ययीभावेषु पूर्वपदार्थप्रधानो योग एव। कुमारीष्वधिकृत्येत्यर्थस्य प्रवृत्ताकस्येत्यनेनान्वयप्रती
तेः उपकुंभमित्यनेन कुंभस्य समीप इत्यर्थस्य समुद्रमित्यनेन समुद्राणां समृद्धिरित्यर्थस्य प्रतीतेः। अधीत्याद्यव्ययस्याव्ययं स
मीप समृद्धीति सूत्रे तो वविभक्त्याद्यर्थत्वस्योक्तत्वात्। विभक्त्याद्यर्थानां समस्यमानान्यपार्थत्वं द्रष्टव्यं॥ इति अर्धपिप्पलीत्यादि

तत्पुरुषेषु पूर्वपदार्थशक्तिसमर्थनं॥ ॥ अब्राह्मणमित्यत्र नञाभिन्नप्रतीतेः असुरा अविद्येत्यादौ नञा विरुद्धप्रतीतेः घटो नास्ती न
ति तत्राभावप्रतीतेः। मृगं त्वभीममित्यादिनञोल्पत्वप्रतीतेः। अन्यविरुद्धाभावसादृश्यानिरनञर्थाः। नन्वब्राह्मणमिति समासां
तर्गतनञोन्यवाचित्वाभिधानमयुक्तं न ब्राह्मणा इति विग्रहाभावप्रसंगात्। अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते इति सू
त्रेणान्यपर्याययोगे पंचमीविधानात्। अन्यथान्यः कृष्णादित्यत्रेव पंचमी स्यात्। भिन्नः कृष्णादित्यत्र न स्यादिती चेत्। न। अन्या
रादितरर्त इति सूत्रे अन्यग्रहणस्य पर्यायार्थत्वेपि इतरग्रहणं कुर्वता सूत्रकृता अन्यपदेन न यावत्पर्यायग्रहणं किंतु कतिपय
पर्यायग्रहणमित्यर्थस्य सूचितत्वेन नञा योगे पंचम्यप्राप्तेः। अन्यथा अन्यग्रहणेनैव कृतत्वेनेतरग्रहणं व्यर्थं स्यात्। न तत्रो
पपदविभक्तिप्राप्त्यभावात्। प्रातिपदिकार्थलिंगपरिमाणवचनमात्रे प्रथमेति प्रथमायाः प्राप्तिसद्भावात् नञोन्याभावनिरूप
णस्याविरोधितात्प्राप्तिप्रदर्शनपूर्वकत्वात्। तादात्म्यप्राप्तेश्च प्रतियोग्यधिकरणपदयोरेकविभक्त्यंतत्वमंतरायोगात्। अधि
करणपदस्य प्रथमान्तत्वात्। न त्वसामानाधिकरण्यापत्तस्याव्यापकताच्च। न ब्राह्मण इत्येव विग्रहो युक्तः नतु न ब्राह्मणादिति।

नचनञोन्यार्थत्वसिद्धौ सूत्रकारस्य नञ्व्यतिरिक्तान्यपर्यायग्रहणाभिप्रायसिद्धिः। तत्सिद्धौ च तत्सिद्धिरित्यन्योन्याश्रयः। इति वाच्यं। अब्राह्म
णइति पदेन ब्राह्मणादन्य इति अवभासस्यथानुपपत्त्या अन्यवाचित्वसिद्धेः। नचनञ्लक्षणयापि तत्प्रतीतिसिद्धिः। मुख्यानुपपत्तिप्र
तिसंधानमंतरा अन्यडिति तत्प्रतीतिः। मुख्यार्थसंबंधित्वेनाप्रतीतेश्च। घटेनेसेवोक्तौ किमनेन घटो नेष्यते। उत घटो न संभवति पट इ
त्युच्यत इति संदेहान्यथानुपपत्त्या च नञोन्यवाचित्वसिद्धेः। नत्वभावान्ययोर्नञ्वाच्यत्वाविशेषाभावे संदेहो युज्यते। नञ्वाच्यसंसर्गा
भावनिर्णयस्यौचित्यात्। ननु नब्राह्मणाइति सामानाधिकरण्यात्। ब्राह्मणेन नञर्थस्य भेदान्वयबोधापत्तिः। प्रतियोग्युपस्थापनमंत
रा नञर्थस्य निरूपयितुमशक्तेन प्रतियोग्युपस्थापनेप्येतस्याभेदान्वयबोधाननुकूलत्वात्। नहि भेदः प्रतियोगिभिन्नश्चेति संभव
ति विरुद्धत्वात्। अत एवासुरं अविद्यपेत्यादौ विरुद्धार्थकनञर्थेन नसुरादिशब्दार्थस्याभेदबोधः। ननु घटो नास्तीत्यत्र भाववाचिनञ् इ
त्युपयुक्तं तथा सति घटस्याभावइत्यत्रैव घटशब्दात् षष्ठीप्रसंगेन प्रथमाभावापातात्। किं चास्तीत्यस्य घटपदेनान्वयेन्यायातः नेतिनि
षिध्य पुनः सत्वविधानात्। नञन्वयपक्षे तु प्रथमप्रतीतो अस्तीत्युपलभ्यमानत्वेन नञर्थस्य भावत्वापातः प्रथमप्रतीतो अस्तीत्युप

लभ्यमानस्याभावत्वांगीकारात्। नहि घटो स्तीति प्रतीतिः घटस्यास्तित्वप्रतीतिनास्तीति प्रतीतिस्तु अभावस्यास्तित्वप्रतीतिर्नेति संभव
ति। घटधर्मितया सत्त्वोल्लेखवत्। अभावधर्मितया सत्त्वोल्लेखस्य साम्यात्। कथमन्यथा भावोऽस्तीत्यपि अभावस्यास्तित्वप्रतीतिरिति चेन्न। उच्य
ते अभाववाच्येव नञ्। तथापि घटो नास्तीति वाक्येन न घटाभावः सत्तया प्रतीयते। किंतु प्रतियोग्येव प्रतियोग्यनुयोगिभावरूपपरंपरासंबं
धेनाभावनिष्ठसत्तायोगितया प्रतीयते अत एव तिङ्कर्तृत्वमिहितत्वात्। कर्तृत्वोपचारविषये घटे प्रथमा। अत एव घटस्याभावोऽस्तीत्य
त्रैव घटो नास्तीत्यत्र घटपदे न षष्ठीप्रसंगः। अभावस्तु निषेधरूपतया प्रतीयते तदुक्तं। स्वरूपेण हि भावाभावौ विधिनिषेधात्मानौ रूपांत
रेण तु निषेधविधिरूपौ तत्रापातज्ञापां संविदि स्वरूपमेव भासत इति। न च घटो नास्तीति ज्ञानात् घटार्थिनः प्रवृत्त्यापत्तिः स्वसत्तायोगित्वज्ञा
नस्यैव प्रवृत्तिहेतुत्वे तस्याभावसत्तायोगित्वज्ञानस्य निवृत्तिहेतोः प्रवृत्त्युपयोगित्वाभावात्। न च घटेंद्रियसंनिकर्षाभावात् प्रत्यक्षेण घटो
नास्तीति प्रतीत्यभावापत्तिः। घटस्मृतिसहकृतायाः घटानुपलब्धेरेव प्रमासतित्वात्। अत एव घटो हि प्रतीयमानः अस्तीति वा नास्ती
ति वा प्रतीयते। विधिनिषेधाववधूय प्रत्यपायोगादिति प्राचां प्रवादोऽप्युपपन्नः। अन्यथा अस्तीति प्रतीतेरेव घटप्रतीतित्वात्। अस्ती

न्तिवानास्तीतिवाप्रतीयत इति प्रवादोप्युपपन्नः। स्यात् अयं च नञ् प्रसज्यप्रतिषेध इत्युच्यते। भूतले घट इति प्रतियोगिप्रसक्तावेव प्र-
दृतत्वात् घटो न घट इत्यत्र सो नञ् पर्युदासः। तादात्म्यप्रसक्तिपूर्वकत्वेपि प्रतियोगिप्रसक्तिपूर्वकत्वाभावात्। एवं न पलाण्डुं भक्षये-
दिति अत्र नञः पलाण्डुभक्षणगोचरभावनानिषेधोर्थः। तेनेष्टसाधनमपि पलाण्डुभक्षणं न भावयेदित्यर्थप्रतीतेः। देवदत्तो न न प-
चतीत्यनेन तु देवदत्तः पाककर्ता न भवतीति अन्योन्याभाव एव प्रतीयते। देवदत्ते पाककर्तृत्वाभाववत्तु पश्चाज्ज्ञायते यथा अयम-
स्य पुत्र इति ज्ञानात्। पुत्रत्वे ज्ञाते पश्चात् पितृत्वं ज्ञायते। यजतिषु ये यजामहं करोति नानुयाजेष्वित्यनेनानुयाजभिन्नेषु यागेषु ये यजा-
मह इति मंत्रं उच्चारयेदित्यर्थो बोध्यः। नानुयाजेष्वित्येकपदं नलोपो नञ इति नलोपाभावः छान्दसः। एतेनानुयाजपदोत्तरसप्तम्याः नञर्थ-
समवेतार्थबोधकत्वमनुपपन्नमिति परास्तं। तस्मात् समासोत्तरविभक्तित्वेन अनुयाजशब्दविभक्तित्वाभावात्। न च मृगं न भीमसित्यत्र ल-
क्षणयापि सादृश्यबोधसंभवात् नञः सादृश्ये शक्तिरिति वाच्यं। सादृश्यस्य मुख्यार्थानुपपत्तिप्रतिसंधानमंतराज डिसेव प्रतीयमान-
त्वेन तत्र लक्षणायोगात्। न च नञः सादृश्यार्थकत्वाभिधानं कर्मनिर्णयविरुद्धं तत्र अतिरिक्तलक्षणाभिस्यन्नाभावान्यविरोधिनां मध्ये न

अन. ता.
११२

ञः कोऽर्थ इत्युक्तत्वादिति वाच्यं। चतुर्षु नञर्थेषु त्रयाणां प्रसिद्धत्वाभावाभिप्रायेणात्र याणामेव संकीर्तनात्। अनुक्तेरदोषत्वात्॥ ॥
इति स्वमतेन नञर्थनिरूपणं॥ ॥मतिकारस्तु उपकुंभमित्यादिरव्ययीभावः अर्धपिप्पलीत्यादिस्तत्पुरुषः पूर्वपदार्थप्रधान एव। कुं-
भस्य समीपे पिप्पल्यर्धे च तात्पर्यात्। अतस्तत्र उत्तरपदे स्वार्थलक्षणा। नञ्समासे शक्तिः। नञ्समासे ब्राह्मणमानयेत्यत्र पर्युदा-
से पूर्वपदेन नञ्तरपदार्थसदृशक्षत्रियलक्षणा घटः अघट इत्यादौ च नञ्सामानाधिकरण्याभावादन्योन्याभाववल्लक्षणाप्येवे-
पि न घटः पट इत्यादौ अन्योन्याभाववल्लक्षणा यथा शुक्लः पटः इत्यत्र शुक्लवल्लक्षणा न पचतीत्यादौ नञ् प्रसज्यप्रतिषेधः। देव-
दत्तः पचतीति पदाभ्यां देवदत्ते पाकक्रियां प्रसज्य नेति प्रतिषेधात्। अस्मिंश्च पाकक्रियासंसर्गाभावे नञ् मुख्य एवं भूतले न घट इत्य-
त्रे न प्रतीयमाने घटसंसर्गाभावे नञ् मुख्यः। यजतिषु ये यजामहं करोति नानुयाजेष्वित्यत्र पर्युदासे नञ् तेनायमर्थः। यजतिषु या-
गेषु नानुयाजेष्वनुयाजव्यतिरिक्तेषु ये यजामह इति मन्त्रं करोतीति नानुयाजेष्विति पदद्वयं न समासः अन्यथा अननुयाजेष्वि-
ति प्रयोगः स्यादित्याहुः। तन्न। लुप्तायाः षष्ठ्या एव स्वार्थबोधकत्वेनोपकुंभमित्यादौ उत्तरपदेषु स्वार्थलक्षणाभावात्। यद्यपि नञ्समा-

रम०
११२

से शक्तिरिति तदपि न। समासे योगरूढशक्तेर्विद्यमानत्वात्। तदपि नञ्समासे ऽब्राह्मणमानयेत्यत्र पर्युदासे पूर्वपदेन नञा परपदार्थ
सदृशक्षत्रिये लक्षणेति तदपि न नञ्भेदे सादृश्ये च शक्तिसद्भावेन द्वाभ्यां शक्तिभ्यां संभूय ब्राह्मणसदृश इति बोधसंभवे सदृशल
क्षकत्वांगीकारायोगात्। त्वन्मते वृत्तिद्वयविरोधाभावात्। भाष्यकृता नञ्युक्तमिवयुक्तं तदन्यस्मिन् तत्सदृशे वर्त्तते। तथा ह्यर्थगति
रिति समासस्याभिन्ने सदृशे च योगस्याभिधानाच्च। अपि च अघटः पट इत्यादौ च नञ्समानाधिकरण्याभावादन्योन्याभाववल्लक्षणो
ति तदपि न। अन्योन्याभाववति नञः शक्तत्वात्। अत एव व्यासेपि नञः अन्योन्याभाववति लक्षणेति परास्तम्। यत्तु न पचतीत्यत्र नञ्
प्रसज्यप्रतिषेध इति तन्न। घटो न पट इत्यादावन्योन्याभावस्येव प्रतीयमानत्वेन पाकसंसर्गाभावपरत्वांगीकारायोगात्। अन्य
था घटो न पट इत्यादावपि नञो पटत्वसंसर्गाभावपरत्वं स्यात्। यदपि नानुयाजेष्वित्यत्र पदद्वयेन समास इति तदपि न। अनुयाज
पदोत्तरं सप्तम्यर्थस्य नञर्थे गतत्वेन मानाभावप्रसंगात्। सुपां प्रकृत्यर्थान्वितस्वार्थबोधकत्वनियमात्॥ ॥ इति मण्युक्तनञर्थभं
गः॥ ॥ शिरोमणिस्तु॥ संसर्गाभावो अन्योन्याभावश्च नञर्थः। तत्र चान्यपि तावच्छेदकावच्छिन्नप्रतियोगिताकत्वं प्रसक्तिविल

त्वम्प्रतियोगिनि यावत्प्रतियोग्यनुयोगिभावेनाभावान्वयितात् तदवच्छेदकस्यैव घटत्वादेः प्रतियोगितावच्छेदकत्वात् उभयाभावात् । अ-
त एव नीलघटवति घटान्तराभावसद्भावेपि घटो नास्तीति न प्रत्ययः । प्रतियोगितावच्छेदकावच्छिन्नस्य प्रतियोगिनोऽभावात् ।
रक्तघटो नेति प्रत्ययस्तु भवत्येव । प्रतियोगितावच्छेदकरक्तघटत्वावच्छिन्नस्य तत्राभावात् । अपचति चैत्रे पाकानुकूलयत्नत्वा-
वच्छिन्नतदनुकूलयत्नाभावादेव चैत्रो न पचतीति पाकानुकूलयत्नसंसर्गाभावः प्रतीयते न तु पाकानुकूलयत्नवति प्रतियोगि-
तावच्छेदकावच्छिन्नस्य प्रतियोगिनः सत्त्वात् । एवं नीलघटो न घट इति न प्रत्ययः । प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगितादात्म्य-
भासमानत्वात् । नीलो घटो रक्तघटो नेति प्रत्ययस्तु भवत्येव प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगितादात्म्यस्य तत्राभावात् । ननु
चैत्रो न पचतीत्यत्र यत्नसंसर्गाभावो अर्थ इति अयुक्तं । अनुयोगिवाचिनि शब्दे सप्तम्यैवात् । संसर्गाभावानुयोगिवाचिनि शब्दे भू-
तले घट इत्यादौ सर्वत्र सप्तमीदर्शनात् । अनुयोगिवाचिनि सप्तमीनियमानङ्गीकारे च घटो न पट इत्यादावपि संसर्गाभावप्रत्ययः
स्यादिति चेत् उच्यते प्रतियोग्यभावान्वये तुल्ययोगक्षेमो तथा च दृस्य(य)दोपस्थापितप्रतियोगिनः सप्तमीविनैवानुयोगिनि आधाराधे-

मा

यभावेनान्वयबोधः सतत्रतत्तदार्थान्वयिनो नञर्थस्य सप्तमीविभक्तेर्वानुयोगित्वाधाराधेयभावेनान्वयबोधः देवदत्तः पचतीत्यत्र प्र
कानुकूलयत्नस्य सप्तमीविभक्तेर्वदेवदत्तेनाधाराधेयभावबोधात् न पचतीतिवाक्याद्बोध्याभावस्यापि सप्तमीविभक्तेर्वाधाराधेयभावेना
न्वयबोधः एवं चैत्रस्येदं वस्तु इत्यनेन संबंधानुयोगिवाचिनि सप्तमीविभक्तेर्व चैत्रसंबंधस्याधाराधेयभावप्रतीतेः निदं चैत्रस्येति सं
बंधाभावस्यापि सप्तमीविभक्तेर्वपुरोवर्तिन्यनुयोगिन्याधाराधेयभावः प्रतीयते। षष्ठ्याश्च वस्तुनिरूपितत्वमेवार्थः ननु चैत्रनिष्ठं स्वामि
त्वं स्वामित्वस्य धनाद्यवृत्तित्वेन चैत्रीयेऽपि धनेनेदं चैत्रस्येति व्यवहाराप्रसंगात् न तु चैत्रीये धनेनेदं चैत्रस्येति न व्यवहारप्रसंगः।
षष्ठ्यर्थस्वामित्वस्य निरूपकतासंबंधेन धनेऽसत्त्वादिति चेत् न। स्वामित्वनिषेधे विशेषणतानाविशेष्यस्यैव प्रतियोगितावच्छेदकसं
बंधत्वेन निरूपकत्वस्य प्रतियोगितावच्छेदकसंबंधत्वाभावात् तथा च निरूपकतासंबंधेन स्वामित्वस्य धनवृत्तित्वे विशेषणताना वि
शेषणस्वामित्वस्य तत्राभावात् चैत्रीयेऽपि धनेनेदं चैत्रस्येति प्रयोगप्रसंगो दुर्वार इत्येषा दिक्। यत्र चाधाराधेयभावेन संसर्ग
मार्यादावललभ्यः तत्रानुयोगिपदे सप्तम्यपेक्षा यथा चैत्रे पाकं कृतिः चैत्रेण पाककृतिः भूतले घटः भूतलेन घट इति चात्र च तास्य

येवस्मात्। कदाचिद्भूतलादौ घटाद्यभावः। कदाचिच्च घटादौ भूतलादिवृत्तित्वाभावः प्रतीयते। अत एव पृथिव्यां गंधानजलं इ
त्यादौ प्रतीतेरैकविशेष्यकत्वानुभावः यत्र च विशेषणविशेष्ययोः भेदान्वयोऽनुसन्नत्तत्रान्योन्याभावो नञा बोध्यते यथार्थ घटो
नीलो नायं घटो नील इति अत्र च विशेषणविशेष्ययोः समानविभक्तिकत्वं विरुद्धविभक्तिविरहो वा तंत्रं। इत्याह तत्रा। संसर्गाभाव
इव केवलान्योन्याभावेन नञः प्रयोगाभावेन संसर्गाभाववदन्योन्याभावस्य नञर्थत्वाभिधानायोगात्। मनु चैत्रो न पचतीत्यत्र यत्न
संसर्गाभावो नञर्थ इत्युक्तं तद्युक्तं। तिङ्यत्नाभानात्। भाने वा धात्वर्थानुकूलयत्नवानित्येव भानेनाप्यंगीकर्तव्यत्वे नञः तदेकदेशे
नयत्ने नान्वयायोगात्। पदार्थः पदार्थेनान्वेतीति नियमस्य बाधकं विना त्यागायोगात्। देवदत्तो न पचतीत्यनेन देवदत्तः पाकक
र्तीनेत्यन्योन्याभावस्यैव प्रतीयमानत्वाच्च। संसर्गाभावप्रतिपादनस्थले संसर्गाभावानुयोगिवाचि निरुक्तसप्तमी नियमादिह तदभावे
नात्र सनञः संसर्गाभावपरत्वाभिधानायोगात्। न च प्रतियोगेनः सप्तमीं विनैवाधाराधेयभावप्रतीतेः तदभावस्यापि सप्तमीं
विनैवाधाराधेयभावबोधः। संभवतीत्युक्तमिति वाच्यं। देवदत्तः पचतीत्यनेन देवदत्तयत्नयोराधाराधेयभावेनान्वयप्रतीतेरजन

नात्। शब्दे देवदत्तपाककर्तृत्वाभेदबोधानंतरं मनस्यैव तद्बोधस्य जायमानत्वात्। अन्यथा घटो न पट इत्यपि पटत्वसंसर्गाभाव
प्रत्ययः स्यात् प्रतियोगिनः पटत्वस्य घटेन संसर्गविधयैवाधाराधेयभावप्रतीतेः। तदभावस्यापि सप्तमीं विनैव तत्प्रतीतिरिति व
क्तुं शक्यत्वात्। यत्तु चैत्रस्येदं धनमित्यादौ षष्ठ्याः धननिष्ठं स्वत्वमेवार्थः इति तन्न। षष्ठ्यर्थस्य संबंधत्वेनासंबंधरूपस्य स्वत्वमात्रस्य
षष्ठ्यर्थत्वाभावात्। अतएव चैत्रीयेपि धने नेदं चैत्रस्येति व्यवहारप्रसंग इति परास्तं। षष्ठीबोध्यस्य व्याप्तस्य रूपत्वेः स्वस्वामिभावसं
बंधस्य धने सत्त्वात्। ननु यदि संसर्गाभावानुयोगिवाचके सप्तमीनियमात् देवदत्तो न पचतीत्यत्र संसर्गाभावो न प्रतिपाद्य इत्यु
च्यते तर्हि नेदं चैत्रस्येत्यत्र चैत्रसंबंधसंसर्गाभावो न प्रतिपाद्यः स्यात् अभावानुयोगिवाचिनीदंशब्दे सप्तम्यभावादिति चेत् न वैष
म्यात्। देवदत्तः पचतीत्यत्र यत्नरूपप्रतियोगिनः सप्तमीं विना धाराधेयभावस्य भानाभावेन न पचतीत्यत्र संसर्गाभावस्य बोध्य
त्वासंभवेपि चैत्रस्येदमित्यत्र संबंधरूपप्रतियोगिनो योगिना सप्तमीं विनैवाधाराधेयभावस्य भावतेन नेदं चैत्रस्येत्यत्र संबं
धाभावस्यानुयोगिना सप्तमीं विनैवाधाराधेयभावबोधसंभवात्। प्रतियोग्यभावयोस्तुल्ययोगक्षेमत्वात्॥ यदपि भूतले न घट

इत्यादौ तात्पर्यवशात् । कदाचित् भूतलादौ घटाद्यभावः कदाचिद्घटादौ भूतलवृत्तित्वाभावः प्रतीयत इति घटे भूतलवृत्तित्वाभा
वबोधस्य शाब्दबोधोत्तरभाविमानसबोधत्वात् । अस्य वाक्यस्य तदर्थबोधोपयोगिपदशून्यत्वात् ॥ ॥ अत्र केचित् । यदा भूतले
घटाभाव इति बोधः । तदा नञः प्रथमान्तस्य च घटपदेनान्वयः समभ्यर्थश्चापि पतात तश्च भूतले घटाभाव इति बोधस्य शाब्दत्व
मनुपपन्नं । यदा तु घटे भूतलवृत्तित्वाभावः प्रतीयते । तदेतत्सम्बर्थेन नञर्थान्वयः । तथा च भूतलवृत्तित्वाभाववान् घट इति बोध
स्य शाब्दत्वमुपपन्नमिति वदंति तन्न । घटो नास्तीति प्रतीतेर्घटविशेष्यकत्वानुभवेनाभावविशेष्यकत्वाभिधानायोगात् । घटो
नास्ति घटाभावोस्तीति प्रतीत्योर्वैलक्षण्यानुभावात् । अत एव घटो नास्ति किं तु घटाभावोस्तीति वक्तारो भवंति अन्यथा घटो नास्ति
त्यत्रैव घटाभावोस्तीत्यर्थस्य लब्धत्वात् । घटाभावोस्तीति प्रागुक्तवैयर्थ्यं स्यात् । यत्तु भूतले घटो नेत्यनेन भूतलवृत्तित्वाभाववा
न् घट इति बोधो भवतीति प्रतिज्ञायते तदुपपत्तये नञर्थस्य सप्तम्यर्थान्वये सप्तम्यर्थाधिकरणत्वाभावबोधप्रसंगेन घटे भूतलवृ
त्तित्वाभावबोधायोगात् । अभाववानिति मतुबर्थबोधायोगाच्च । अपरे तु भूतले न घट इत्यादौ सप्तम्यन्तस्य नञर्थान्वयः तस्य च प्र

दो

तियोगिविशेषणत्वेनान्वयः तेन भूतलवृत्त्यभावप्रतियोगिघट इति घटविशेष्यकान्वयबोधः स्यात् तन्नाऽस्तीत्यस्मान्नान्वयप्र
संगात् । अभावप्रतियोग्यप्रसक्तिरित्यस्य व्याहतत्वादिति शिरोमण्युक्तनञर्थभंगः ॥ ॥ द्वन्द्वो द्विविधः । इतरेतरद्वन्द्वः समाहारद्व
न्द्व इति । उभयत्रापि समस्यमानपदानां चार्थे लक्षणा वा चार्थे द्वन्द्व इति सूत्रेणोक्ता चार्थवर्तमानानां द्वन्द्वानुशासनात् । तत्रेतरेत
रयोगे धवखदिरा इत्यत्र पूर्वोत्तरपदयोरन्यार्थोपसर्जनकस्वार्थे लक्षणा छिदिक्रियायाः धवखदिरस्वरूपद्वये अन्वयात् । न तु ध
वखदिरावित्यत्र चार्थस्याभानमेव नेति न लक्षणेति चेत् । अत्र वक्तव्यं । किं धवखदिरावितिपदात् । अनुभूयमानस्य चार्थभानं ने
ष्यते न तदनुभूयमानस्येति नाद्यः । तत्र तस्याभावस्याबाधसत्त्वात् । न द्वितीयः । चार्थे द्वन्द्व इति सूत्रार्थाभिज्ञस्य द्वन्द्वपदश्रवणे
चार्थभाननियमात् । अन्यथा अनेकमन्यपदार्थ इति सूत्रार्थाभिज्ञस्याप्यज्ञवत् । चित्रग्वादिशब्दश्रवणे अन्यपदार्थभानं न स्या
त् । अपि च इतरेतरयोगो नाम परस्परसमस्यमानपदार्थयोः परस्परसापेक्षत्वं तच्च छिदिक्रियायां योग्यत्वादिरूपमनेकविधं तच्चे
तरेतरयोगत्वाख्यसामान्यरूपेणैव प्रतीयते न तु विशेषरूपेण । न च लक्षणां विनाऽभावान्नेतरेतरयोगे लक्षणेति वाच्यं

इतरेतरयोगे तात्पर्यानुपपत्तेरेव लक्षणाबीजत्वात् लक्षणानंगीकारे च द्वंद्वो न स्यात् अनेकयोः सुबंतयोः चार्थवर्तमान
त्वरूपद्वंद्वप्रयोजकाभावात्। न च चैत्रमैत्रौ साध्वसाधू इत्यत्र द्वंद्वो न स्यात् चैत्रमैत्रयोरितरेतरसादृश्यरूपेतरेतरयोगाभा
वेन तद्विवक्षासंभवादिति वाच्यं तत्रापि गंगातीरवासित्वादिना तुल्यावपि देवदत्तयज्ञदत्तौ साध्वसाधू इति बोधस्य ज्ञायमा
नत्वेनेतरेतरयोगसद्भावात्। अत एव साध्वसाधू इति द्वंद्वोपि न निमित्तशून्यः समस्यमानपदार्थयोः साध्वसाध्वोः सादृश्यरू
पेतरेतरयोगसद्भावेन तद्विवक्षासंभवात्। भेरीपटहमित्यादिसमाहारद्वंद्वेपि तु समस्यमानपदयोः समाहाररूपेर्थे
व्यासज्यवृत्तिलक्षणेव समाहारस्यैकत्वादेकवचनं न च भेरीपटहमित्यादौ धर्मप्राधान्ये क्रियान्वयानुपपत्तिः अरुणयापिं
गाक्ष्येत्यत्र रूण्यादीनां धर्मिद्वारा क्रियान्वयवत् भेरीपटहं वादयेत्यादौ समाहारस्य धर्मिद्वारा वादनक्रियान्वयसंभवात्। पि
तरावितिनित्ये द्विवचनांतस्य मातापित्रोः शक्तिरेव मातापितरौ पितरौ मातरपितरावित्यभिधानात्। न यथा एकमोक्ता ज्ञो दिवा
करनिशाकरावित्यभिधानात्। पुष्पवंतावितिनित्यद्विवचनांतः शब्दः दिवाकरनिशाकरयोः शक्तः एकवचनद्विवचन

बहुवचनान्तस्तु पितृशब्दः जनकमात्रवाचकः अत एव पाणिनिः मातापितरएवित्यस्य पितरावित्यादृशाद्यभिप्रेत्य पितामात्रेति विरू
पैकशेषमभाणीत्। एवं सर्वत्र विरूपैकशेषे द्रष्टव्यं एवं सरूपैकशेषे घटौ घट इत्यादौ बोध्यं क्कि नित्यविवादं पितामात्रेत्यादिसूत्राणि न
मातृपितरावित्यादिशब्दानामादेशविधायकानि अपि तु मात्रादिशब्दानां लोपविधायकानीति पक्षे लुप्तमात्रादिशब्दस्मरणसहकृ
ताः पित्रादिशब्दा एव मातापित्रादीनां बोधकाः। स[illegible]मस्समानपदानां चरमशब्दातिरिक्तसमस्यमानपदान्यपदार्थपरत्वे बहुव्रीहिः। चार्थ
परत्वे तु द्वंद्व इति भेदो द्रष्टव्यः। इति स्वमते द्वंद्वलक्षणसमर्थनं॥ ॥अन्ये मन्यन्ते इतरेतरयोगद्वंद्वे धवखदिरौ छिंदीत्यादौ विभक्त्यु
पनीतद्वित्वस्य धवखदिरयोः प्रत्येकं न योग्यत्वं न वा साकांक्षत्वमिति पदशक्तेर्द्वित्वान्वयानुपपत्त्या अन्वययोग्यखदिरसहितधवोप
स्थितये धवपदे प्रथमं साहित्ये लक्षणा। न च साहित्यस्यैकत्वादेकवचनापत्तिः॥ साहित्यस्य लक्ष्यतावच्छेदकत्वे न साहित्याश्र
ययोरेव लक्ष्यत्वात्। तयोश्चैकत्वाभावात्। न च घटौ घटा वित्यत्र द्विवचनबहुवचनान्वयाय घटपदेऽपि साहित्यलक्षणप्रसंग इति वाच्यं
इष्टत्वात्। अत एव सरूपाणामेकशेष एकविभक्ताविति द्वंद्वापवादकं शेषं पाणिनिरभाणीत्। उक्तं च सहभावविवक्षायां द्वंद्व इति द्वंद्वैक

शेषयोः क्रमेणार्थप्रतीतौ न साद्विवचनादिकमिति न चैवं धवपदेनैव पूर्णत्वात् खदिरपदवैयर्थ्यं। खदिरपदं विना नियमेन खदिरानुपस्थि-
तेरिति साहित्याश्रयद्वितीयविशेषणतापन्नार्थत्वात्। खदिरपदाभावे च घटाविसनेन पटद्वयधीरिव वह्निवद्द्वयधीः स्यादिति। नन्वत्र अवयवशक्ति-
सहृदह्नतेन द्वन्द्वप्रातिपदिकेनैव धव खदिरयोर्युगपदुपस्थितिसंभवेन द्वित्वान्वयसिध्यर्थं धवपदलक्षणांगीकारायोगात्। प्रत्ययानां प्रकृत्यर्था-
न्वितस्वार्थबोधकत्वेन केवलधवपदस्य समासेतरद्विवचनप्रकृतित्वाभावेन द्वित्वान्वयाय धवपदे लक्षणाभिधानायोगाच्च। खदिरपदवै-
यर्थ्यप्रसंगाच्च।। यदत्रोक्तं। खदिरपदं विना न नियमतः खादिरोपस्थितिः अतः साहित्याश्रयद्वितीयविशेषणतापन्नाय खदिरपदमावश्यक-
मिति।। ।।तन्न विशेषणलक्षणयैव साहित्याश्रयखदिरोपस्थितिसंभवे इतरसहितधवे लक्षणामंगीकृत्य साहित्यप्रतियोगिनिरूपणा-
यवक्ता खदिरपदप्रयोगस्य कर्तव्यत्वात्। न च धवपदस्य खदिरसहितधवे तात्पर्यज्ञापनाय खदिरपदप्रयोग इति वाच्यं। खदिरपदस्य चा-
र्थपरत्वाभावे न धवपदस्य तेन सहद्वंद्वाभावप्रसंगात्। तात्पर्यांगीकारे च धवपदवत्। खदिरपदेपि लक्षणा स्यात्। ननु द्वित्वान्वयिता-
वच्छेदकावच्छिन्नप्रातिपदिकार्थद्वित्वान्वयो भवति तदन्वयितावच्छेदकं च रूपसाहित्यमिति तदुपस्थितये लक्षणा आश्रयणीयेति चे-

न्न। पदार्थतावच्छेदकयोर्धवत्वखदिरत्वयोरेव विभक्त्यर्थान्वयितावच्छेदकत्वेन साहित्यस्यानवच्छेदकत्वात्। किंच पदसाहित्योपस्थितिमन्त
राहित्यसंबंधेनोभयसंभवः। नहि द्वित्ववत् साहित्यस्यापि व्यासज्यवृत्तित्वात्। तत्संबंधबोधार्थव्यासज्यवृत्तिधर्मितावच्छेदकव्यः स्यात्। त
स्याप्येवं तस्याप्येवमिति अनवस्थाप्रसंगः। नन्वेवमपि विभक्त्यर्थान्वयेनामार्थत्वं तत्र न च धवखदिरपदयोर्मिलितयोर्नामत्वं अतः धवख
दिरयोः। नामार्थत्वसिध्यर्थं धवपदस्योभयलक्षकत्वमिति चेन्न। समासोत्तरविभक्तिं प्रति संभूयैव प्रातिपदिकत्वेन धवशब्दमात्रस्य प्रतिपद
कत्वाभावेनोभयोर्धवपदार्थत्वमेव नामार्थत्वाभावप्रसंगात्। न च शब्दद्वयेनान्वयभावात्। मिलितयोर्न धवखदिरोपस्थापकत्वमिति वाच्यं।
देवदत्तयज्ञदत्तयोर्व्यासज्यवृत्तिशक्त्यभावेपि संभूयकार्यकारित्ववत् चक्षुषः घटाद्यनेकवृत्त्येकसंनिकर्षाभावेपि अनेकसंनिकर्षेण
समूहालंबनजनकत्ववत् पृथक् पृथक् स्वशक्तिवशादेव मिलितयोर्धवपदखदिरपदयोर्धवखदिरोपस्थापकत्वं तत्संभवेनोभयो
रपनामार्थत्वासंभवात्। ननु यदि पृथक् पृथक् पदोपस्थाप्ययोरपि हितान्वयस्तर्हि चंद्रे कलंकः सुजने दरिद्रता विलासलक्ष्मीः कम
लेषु चंचला। सुखप्रसादः सधनेषु सर्वदा यशो विधातुः कथयंति खंडितम् इत्यत्र तानीत्यध्याहारो न स्यात्। कलंकादिपदोपस्थापिता

नामेवकथं पंतीत्यनेनान्वयसंभवात्। इति चेन्न। इष्टत्वात्। उपस्थितानेकैकत्वानां बहुत्वसंख्याविरोधाभावेनोपस्थितानेकैकत्वा
अधिकरणे बहुत्वान्वयसंभवात्। अन्यथा एतानीति बहुवचनेनान्वयसिध्यर्थं पदांतरमध्याहार्यं स्यात्। तथा चानवस्थापत्तुः अध्या
हारप्रदर्शनं तत्तु सुबोधार्थमिति न दोषः। अध्याहारं विनैव व्याख्यातुर्बोधस्य जातत्वात्। अन्यथा अध्याहारेऽस्यसे तस्यान्वयबोधः। अन्वय
याबोधानंतरं पदांतरपरित्यागेन विवक्षितपदाध्याहार इत्यस्यान्याश्रयः। ननु विभक्तेः पदार्थतावच्छेदकसमनियतसंख्याबोधकत्व
नियमात् तदनुरोधेन द्वंद्वेऽपि द्वित्वादिसंख्यासमनियतस्य साहित्यस्य पदार्थतावच्छेदकत्वसिद्धये धवपदस्य लक्षणेति चेन्न। प्रथम
प्रतीतधवत्वखदिरत्वरूपपदार्थतावच्छेदकसमनियतसंख्याबोधकत्वसिद्धये द्विवचनस्यैव धवत्वखदिरत्वसमनियतैकत्वद्वय
लक्षकत्वस्वीकारस्यैवोचितत्वात्। प्रधानप्रातिपदिकानुसारेण अप्रधानविभक्तेर्नेयत्वात्। एवं च तद्विभक्तिबोध्यं द्वित्वं न तु धवखदिरप
दार्थतावच्छेदकं यत्र चैतत्पदार्थतावच्छेदकं तत्रैव द्वित्वमिति नियमस्य लक्षणाविरहेऽपि परित्यागाभावेन लक्षणावैयर्थ्यात्।
चा द्विवचनादिकं पदार्थतावच्छेदकाधिकरणपर्याप्त्यधिकरणसंख्याबोधकमिति नियमस्त्वप्रामाणिकः। ननु योग्यतावच्छेदकरू

येणोपस्थितएवशाब्दार्थे इतरशाब्दार्थान्वयो भवति। द्वित्वान्वयितावच्छेदकं च रूपसाहित्यमेवेति। तदुपस्थितये लक्षणेति चेन्न।
योग्यताज्ञानस्य शाब्दबोधाहेतुत्वात्। अन्यथा योग्यता। अग्निना सिंचेदिति वाक्यात्। अन्वयबोधो न स्यात्। न चेष्टानुपपत्तिः। निर
कारणाभावप्रसंगात्। यदपि घटौ घटा इत्यादावपि साहित्यं लक्षणाप्रतिपादनं। तदपि न। शक्त्या घटद्वयोपस्थितेरेव द्विवचनान्व
यसंभवे साहित्यबोधप्रयोजनाभावात्। नहि घटशब्दोऽनेकस्यामेव शक्तौ शक्तः। न वानंत्यं त इति संभवति। घटान्तरे घटशब्दव्यवहा
राभावापातात्। अनेकव्यक्तिषु काशकाकानेति निर्णयसंभवेन घटशब्दव्यवहारविलोपापाताच्च। इति द्वंद्वे मीमांसकोक्तपूर्वपदल
क्षणाभंगः॥ ॥वैयाकरणामन्यंते। लक्षन्यग्रोधाविति द्वंद्वे पूर्वोत्तरे द्वे अपि पदे द्व्यर्थे प्लक्षन्यग्रोधधवखदिरपलाशा इत्यादि द्वंद्वे
सर्वाण्यपि पदानि बह्वर्थानि। न च लक्षन्यग्रोधाविति द्वंद्वे बहुषु बहुवचनप्रसंगः। बहुत्वाभावात्। किमुच्यते बहुत्वाभावादिति
यावतेदानीमेवोक्तं पूर्वोत्तरे द्वे अपि द्व्यर्थे इति याभ्यामेवैको द्व्यर्थस्ताभ्यामेवापरोऽपि द्व्यर्थः। न त्वपराभ्यां। एवं च द्वित्वोऽर्थे बहुत्वाभा
वात्। बहुवचनाभावः न चैकेनोक्तत्वात्। अपरस्य प्रयोगोऽनुपपन्नः। उक्तार्थानामप्रयोग इत्यस्याभावादिति वाच्यं अनुक्तत्वात्सत्त्वेन्य

ग्रोधस्य न्यग्रोधपदप्रयोगः। कथमनुक्तः पावता इदानीमेवोक्तं प्लक्षोपि द्व्यर्थः। न्यग्रोधोपि द्व्यर्थ इति। सहभूतावेवान्योन्यस्यार्थमाहतुः
न पुनः पृथग्भूतौ किं पुनः कारणं सहभूतावेवान्योन्यस्यार्थमाहतुः। न पुनः पृथग्भूतौ स्वभावस्य तथाविधत्वादिति तत्र प्लक्षन्यग्रोध
पदयोः स्वार्थमात्रशक्तत्वेन द्व्यर्थत्वायोगात्। नन्वजहत्स्वार्थलक्षणया एकैकस्य द्व्यर्थत्वं संभवतीति चेन्न। एकैकेनैव पदेनोभयोक्तिसंभ
वे न पदांतरवैयर्थ्यप्रसंगात्पदत्रोक्तं। सहभूतावेवान्योन्यस्यार्थमाहतुः। न पुनः पृथग्भूताविति। तदपि न। काकेभ्यो दधि रक्ष्यतामित्य
त्र मार्जारादिपदासहितस्यापि काकपदस्य लक्षकदर्शनात्। प्लक्षन्यग्रोधावित्यत्र प्लक्षश्च न्यग्रोधश्चेति विग्रहाभावापाताच्च। न चेदमि
ष्टापादनं। प्लक्षौ च न्यग्रोधौ चेत्येव विग्रहांगीकारादिति वाच्यं। सहभूतावेवान्योन्यस्यार्थमाहतुरित्यस्यैवाभिधानेनासहभूतयोः विग्रह
वाक्ययोः प्लक्षश्च न्यग्रोधपदयोः द्व्यर्थत्वाभावेन द्विवचनांतत्वायोगात्। अन्यथा प्लक्षो न्यग्रोधश्चास्तीति प्रयोगो न स्यात्। न तु मातरौ च पि
तरौ चेति स्थिते द्वंद्वापवादकं पितराविति अभाणादिरूपे अन्यथा मातापिता चेत्येकशेषं पा[illegible]नि स्थिते पितामात्रेति सूत्रं एकशेष
विधायकं स्यात्। न चेष्टापत्तिः। एकवचनात्तिनिः विरुद्धपितृशब्दस्य द्विवचनांतत्वाभावप्रसंगात्। तथा च न तस्य मातरौ पितरौ चेति स्थि

तिरंगीकार्यमितिधवखदिरावित्यत्रधवौचखदिरौचेतिविग्रहः।घटपटत्वंमाइतिवहुवचनांतसमासेघटाश्चपटाश्चत्वंमाश्चेतिवि
ग्रहोंगीकार्यः।वैरूप्येकारणाभावादितिचेत्र।मातापितरावितिप्रयोगप्रसंगेपितरावित्यपिप्रयोगःसाधुः।इत्यभिप्रेत्यसूत्रकृ
तापितामात्रेत्येकशेषस्याभिहितत्वेनवस्तुतःमातरौचपितरौचेतिस्थितेएकस्यमातृनाविभ्यस्यलोपःपितरावित्येतद्विवचनां
तस्यावशेषोभवतीत्यर्थस्यसूत्रकारानभिमतत्वात्॥ ॥इतिवैयाकरणोक्तद्वंद्वार्थभंगः॥ ॥मणिकारस्तु॥इतरेतरयोगद्वंद्वेए
कस्मसाहृठपदद्वयात्खस्वशक्त्यास्वस्वार्थयोरेकस्मृतिसंभवात्।अनेकस्मृत्यर्थंनसाहित्यलक्षणा।एवंचपदद्वयादुपस्थिते
धवखदिरस्वरूपेद्वित्वान्वयोबोध्यते।यथैर्द्वियसंनिकृष्टेधवखदिरस्वरूपेप्रत्यक्षेणद्वित्वंबोध्यते।नचतत्रतयोःस्वरूपातिरिक्तंतु
त्वद्वारत्वादिकमस्ति।ज्ञायतेवासमाहारद्वंद्वेपाणिपादंपंचपूलीत्यादौतावद्वस्येकधर्माभिधानंलक्षणयैवतदेकत्वादेकवचनं
तदाहुः।समाहारस्तंसमाहारः।अनेकस्यैकीकरणंएकोधर्मइतियावत्।सचैकोधर्मः।सेनादाविवद्विवहुत्वसंख्याः अपेक्षाबुद्धि
विशेषविषयत्वंवाविरूपैकशेषेतुपितराविसत्रएकस्यपितृद्वयाभावात्अगत्यापितृपदेजनकद्वंपसलक्षणाविभक्त्युपनीतंच

द्वित्वविरूपयोरेव मातापित्रोरवगम्यते एवं ब्राह्मणौश्वशुरौभ्रातरौ शिवावित्यादि। विरूपैकशेषमात्रे लक्षणेति तन्त्राद्द्वन्द्वावयवा
नां इतरेतरयोगे चार्थे शक्तिलक्षणायोरन्यतराभावे द्वन्द्वाभावप्रसंगात् चार्थे द्वन्द्व इति चार्थे वर्तमानानां सुवन्तानां द्वन्द्वाभिधा
नात् द्वित्वान्वयाय एकस्मात्सारूढपदद्वयस्य संभूयस्वार्थानुभावकत्वस्यैव वक्तव्यत्वे नैकस्य स्वाभिधानायोगात्। नचस्वर्थमात्रणयो
द्वित्वान्वयो बोध्यः येनैकस्यस्वाभिधानं प्रयुक्तं स्यात्। किं त्वनुभूयमानयोः नच युगपदनुभावकत्वस्य व्यर्थमेवार्थद्वयगोचरैकस्यस्व
भिधानमिति वाच्यं पदयोरेकस्य स्वरूपारूढत्वमात्रेण तत्संभवात्। यदपि समाहारद्वन्द्वो प्राणिपादपंचपूलीसादौ तावद्बहुत्वैकधर्मा
भिधानलक्षणायैवेति तत्र वक्तव्यं तत्किं सर्वेषां पदानां तावद्बहुत्वैकधर्माभिधाने लक्षणा उतैकस्या येपि लक्षणा किं प्रत्येकं पदेषु प
र्याप्ता उत व्यासज्यवर्तमाना नाद्यः पदान्तरवैयर्थ्यप्रसंगात्। न द्वितीयः। अपर्याप्तानां तात्। नापि द्वितीयः। पदान्तरवैयर्थ्यप्रसंगात्। यद
पि पितरावित्यत्र विरूपैकशेषे जनकदांपत्यलक्षणेति तदपि नापितरावितिनित्यद्विवचनान्तपदाद्दम्पत्युष्यवंतावितिशब्दस्य दि
वाकरनिशाकरयोरिव मातापित्रोरुक्तत्वात् अत एव मातापितरावितिप्रयोगप्रसंगेन त्समानार्थत्वात्। पितरावित्यपि प्रयोगः। सा

धुरिति ज्ञापनाय विज्ञामात्रेति तिपाणिनिरेव कशेषमभाणीत्। अन्यथा छत्रिणो गच्छंतीत्यत्र काके भ्यो दधि रक्ष्यतामित्यादावपि का
कादिपदानामेकशेषमभिदध्यात् वैषम्ये कारणाभावात्॥ ॥इति मण्युक्तद्वंद्वार्थभंगः॥ ॥ अस्मादिशद्ववदाख्यातो नानार्थः तथा
च हि देवदत्तः पचतीत्यादौ कर्तृवाचकत्वस्य पच्यते तंडुलो देवदत्तेनेत्यत्र कर्मवाचकत्वस्य दृष्यते आस्यते देवदत्तेनेत्यादौ भाववाचकत्व
स्य लः कर्मणि भावे चाकर्मकेभ्य इति स्मृतिसिद्धत्वात्। आख्याताभिधेयश्चानेकप्रकारः॥ धात्वर्थानुकूलभव्यापारवान् धा र्ता
त्वर्थाश्रयः धात्वर्थप्रतियोगी चेति पचतीत्यनेन पाकानुकूलव्यापारवत्त्वस्य रथो गच्छति देवदत्तो जानाति इच्छति यतते द्वेष्टि निद्रातीत्या
दिना धात्वर्थभूतगमनाद्याश्रयत्वस्य नश्यतीत्यनेन नाशरूपधात्वर्थप्रतियोगित्वस्य प्रतीतेः। न च कृतिरेवाख्यातार्थः रथो गच्छती
त्यादौ चाख्यातो लक्षणयैव धात्वर्थाश्रयत्वादिकमाचष्ट इति नाश्रयत्वादौ शक्तिरिति वाच्यं प्रयोगसाम्ये एकत्र शक्तिः अन्यत्र ल
क्षणेति बाधकं विना कल्पनायोगात्। न चात्र मुख्यार्थानुपपत्तिप्रतिसंधानपूर्वकं आश्रयत्वादिप्रतिपत्तिरस्ति। येनाख्यातस्या
श्रयत्वादौ लक्षणेति प्रतीमः आख्यातस्य कृत्यर्थकत्वे मानाभावाच्च। न च पचतीति प्रयोगाज्जायमानकृत्यनुभव एव तत्र मानं कृत्य

नुभवस्यानस्रयोगजन्यत्वासिद्धेः। धात्वर्थानुकूलव्यापाराश्रयत्वेज्ञातेतेनलिंगेनयत्नानुभवइत्यंगीकारात्। नचलिंगेनयत्ना
नुभवांगीकारेयत्नेवर्तमानत्वान्वयानस्यात् अपदार्थत्वादितिवाच्यंदृष्टत्वात्। यत्नेवर्तमानत्वबोधस्यैवासिद्धेः। भावेवाप्यस्य
सेत्पाकानुकूलव्यापाराविज्ञानानंतरं अनुमितेयत्नेमनसावर्तमानत्वपरिच्छेदवत् शब्देनव्यापारबोधानंतरं अनुमितेयत्नेमन
सावर्तमानत्वपरिच्छेदसंभवात्। अतएवकिंकरोतिदेवदत्तः पचतीतिनियोगोप्युपपन्नः व्यापारश्रयत्वस्यप्रसक्तयोग्य अत
एवप्रासंक्षिकव्यापारानुकूलव्यापाराश्रयज्ञानस्यपचतीत्याकारत्वमुपपन्नं। अन्यथातत्ज्ञानंमूकवित्तानवत्शब्दानुल्लेखिस्या
त्। अतएवपाकानुकूलव्यापारसमाप्तिवित्तोनेनापाक्षीदितिप्रयोगः अतएवतस्यवित्तविज्ञानात्। पक्ष्यतीतिप्रयोगः नचर
थः किंकरोतियथ्येतिनियुक्तेनगच्छतीतिप्रयोगात्।। गत्यनुकूलव्यापाराश्रयत्वमेवगम्यत इत्याख्यातार्थः स्यात्। एवंपततइत्या
दावपिधात्वर्थानुकूलव्यापाराश्रयत्वमेवाख्यातार्थइतिवाच्यं। रथः किंकरोतीतिकरोतिनारथः। किंविषक्रियाश्रयइतिप्रश्ने
गच्छतीतिगत्याश्रयत्वाभिधानरथेवोत्तरत्वसंभवात्। निद्रातीत्यादिनानिद्रायाश्रयत्वस्यैवभानाच्चानचकरोतेर्यत्नार्थत्वात्। क

रोतिनाक्रियाविषयकप्रश्नोनुपपन्न इतिवाच्यं।क्रियांतत्कृधातोरेवपत्वपरत्वेनकृधातुमात्रस्यपत्वपरत्वाभावात्।अन्यथाकृधा
तुप्रकृतिकयोःक्रियाकृत्यापदयोर्यत्नार्थकत्वंस्यात्।अतएवडुकृञ्करणइतिधात्वाख्यानं।अन्यथाडुकृञ्कृतावित्यवक्ष्यत्।यदातु
किंकरोतीतिप्रश्नेनश्यतीत्युत्तरं।तदानकिमपिकरोति।अपितुनाशवानित्येवोत्तरार्थः।धात्वर्थानुकूलव्यापाराश्रयस्यधात्वर्थाश्रयस्य
धात्वर्थप्रतियोगिनश्चकर्तृशब्दार्थत्वांगीकारएवदेवदत्तःपचतिरथोगच्छतिघटोनश्यतिइत्यादिप्रयोगाणांकर्तरिप्रयोगत्वंलोकसि
द्धं।भवतिकर्तृवाचकानांदेवदत्तादिपदानांचतिङ्तेनसामानाधिकरण्यंचोपपन्नंभवति।कर्तरिशबितिकर्तरिविहिताशबादिप्र
त्ययस्योपपन्नाभवंति।ननुयदिधात्वर्थाश्रयःकर्तास्यात्तर्हितंडुलःपचतीतिप्रयोगःस्यात्।तंडुलस्यपाकाश्रयत्वेनकर्तृत्वात्।इतिचे
न्न।स्यात्स्यधःसंतपनस्येवपचर्थत्वेनअयपराणिष्टस्यतस्यतंडुलनिष्ठत्वाभावात्।अन्यथातंडुलस्यपरसमवेतक्रियाजन्यफलाश्रय
त्वाभावेतत्कर्मत्वंनस्यात्उत्सर्गतकर्मणः।परसमवेतक्रियाजन्यफलशालित्वात्।तंडुलेपाकइत्यादिप्रयोगस्तुपाकपदस्यपाकफ
लेलाक्षणिकत्वेनोपपन्नः।यत्रचकर्मणःधात्वर्थाश्रयत्वंतत्रकर्मण्यपिकर्तृत्वविवक्षयाप्रयोगोनानुपपन्नः।मामहंजानामीतिप्रयोग

स्यसर्वलोकसिद्धत्वात्तमदिकाष्ठेककर्तृत्वविवक्षानर्हिकाष्ठंपचतीतिप्रयोगोनतिवार्यतेघटंकरोतीत्यत्रघटोत्पत्त्यनुकूलक्रिया
याःधात्वर्थत्वात्तदाश्रयःकुलालःकर्ताघटोजायतइत्यत्रजन्याश्रयत्वाद्घटएवकर्तानतुदेवदत्तःपचतीत्यादिप्रयोगाःकर्तृ
वाचकत्वान्नकर्तृप्रयोगाइत्युच्यतेअपितुकर्तृसंख्यावाचकत्वात्अतएवैयोप्रपपन्नाभवंतिकर्तृवाचकदेवदत्तादिपदस्या
ख्यातस्यचभिन्नप्रवृत्तिनिमित्तकत्वेसत्येकार्थाभिधायकत्वलक्षणसामानाधिकरण्यमसिद्धंमेवपचतीत्यनेनकर्तृसंख्यामा
त्रप्रतीतेरन्यादर्शत्वप्रयोजकेतस्यकर्तरिशक्त्यनुपपादकत्वादितिचेन्न।कर्त्रादिवाचकदेवदत्तादिशब्दोत्तरसुब्युक्तसंख्या॥वरू
द्धेनकर्तृनिरूपितायाःसंख्यायाःकर्तृसंख्यात्वायोगात्नचसुवाख्याताभ्यामेकस्यामेवकर्त्रादिसंख्यायाअभिधानेनान्वयाभाव
प्रसक्तःकर्त्रादिसंख्यात्वाभावआख्यातोक्तसंख्यायाइतिवाच्यंपचतीत्युक्तेपाककर्तृत्वमनुभवस्यजायमानत्वात्तदनुसारेण
ख्यातएवसंख्याविशिष्टंकर्त्तारमाचष्टइत्येवकल्पनस्योचितत्वेनोक्तस्यसंख्यामात्रवाचकत्वकल्पनायोगात्देवदत्तस्तंडु
लंपचतीत्याख्यातोक्तसंख्यायाकर्तरिवकर्मणोपिधर्म्याकांक्षापूरकत्वेनकर्त्रैवान्वयःनकर्मणेतिनियमाभावप्रसंगाच्च।

देवदत्तः पचतीत्यत्र सुबाख्यातयोः समानाधिकरणानुरोधात् आख्यातोक्तसंख्यायाः कर्त्रैवान्वयो न कर्मणेति चेत् अत्र वक्त
व्यं किं सुबाख्यातयोः समानाधिकरण्यं किमेकसंख्याभिधायकत्वं उत भिन्नप्रवृत्तिनिमित्तकत्वे सत्येकार्थवाचित्वं प्रकृत्यन्तरत्वं॥
नाद्यः। साध्यवैशिष्यात् न द्वितीयः आख्यातप्रकृतिभूतस्य धातोः कर्तृवाचित्वाभावात् ननु चैत्रः पचतीत्यत्राख्यातोक्तभावना
याः कर्त्रन्वय तदुक्तसंख्यापि कर्त्रैवान्वेति न कर्मणा यं यं भावनानुधावति तं तं तत्संख्यापीति नियमादिति चेन्न पचतीत्याख्या
तोक्तभावना कर्तारमेवानुधावति पच्यत इत्याख्यातोक्तभावना कर्मैवानुधावतीत्यत्र नियामकस्य वक्तव्यत्वात् ननु भावना हि
व्यापारस्य च कर्मत्वाद्यनवरुद्धं धर्मिणमाकांक्षति धर्मत्वाद्यनवरुद्धो धर्म्मी च क्रियान्वयाय व्यापारमाकांक्षति तत्र चैत्रस्तंडुलं
पचतीत्यत्र प्रथमान्तपदोपस्थापितश्चैत्रः कर्मत्वाद्यनवरुद्ध इति भावना चैत्रमनुधावति न तंडुलं तस्य द्वितीयोक्तकर्मत्वाद्यन
वरुद्धत्वात् एवं चैत्रेण पच्यते तंडुल इत्यत्र कर्मत्वाद्यनवरुद्धं प्रथमान्तपदोपात्तं तंडुलमेवानुधावति आकांक्षावशात् न कर्ता
रं तस्य चैत्रेणेति तृतीयोक्तकर्तृत्वावरुद्धत्वात् इति चेन्न भावनायाः व्यापारत्वेन धर्म्याकांक्षित्वे चैत्रेण पच्यते तंडुल इत्यत्रापि भा

ख्या

१:

वनायां कर्त्रन्वयापातात् । न च तृतीयपाककर्तृत्वस्योक्तत्वात् न कर्त्तरि माकांक्षेति इति वाच्यं । कर्तरि वा प्रत्ययेन कर्तृत्वोक्तौ सुतरां
तदाकांक्षितत्वस्यौचित्यात् । ननु भावनायाः धर्मिमात्राकांक्षितत्वेपि न चैत्रस्य भावनाकांक्षा चैत्रे होतीति तृतीयोक्तकर्तृतांतर्गतकृति
रूपभावनावरुद्धत्वात् कर्मणश्च धात्वर्थान्वयायभावनाकांक्षितात् । विषयविषयभावेन कर्मणो वान्वय इति चेत् न प्रथमाख्याता
भ्यां एकसंख्याभिधानवत् तृतीयाख्याताभ्यां मिलित्वा एकभावनाभिधानसंभवात् । अन्यथा धात्वर्थविषयकाख्यातोक्तभावनान्व
यत्र हि तस्य धात्वर्थान्वयित्वे तृतीयोक्तभावनान्वयिनि चैत्रस्य धात्वर्थान्वयो न स्यात् । किंच चैत्रेण पच्यते । तंदुल इत्याख्यातोक्तभा
वनायाः कर्मणश्च याश्रयिभावेनान्वयाभावात् । आख्यातोक्तसंख्याया अपि कर्मणाश्रयाश्रयिभावेनान्वयो न स्यात् । संख्यान्वय
स्य भावनान्वयानुसारित्वात् ॥ न च भावनानुसारित्वात्संख्यायाः कर्मान्वये शास्य पश्चाद्योग्यतावलात् । आधाराधेयभावेनान्वयो भ
वति तद्यथा कांतारे समुपस्थिते सहायेन गच्छतः सार्थस्य तदत्यये स्वेच्छाविहार इति वाच्यं भावनायाः कर्त्र्यन्वयसद्भावेन पच्य
त इत्याख्यातोक्तसंख्यायाः कर्त्रन्वयापातात् । अथ भावनाविशेष्ये संख्यान्वयो भवति चैत्रः पचतीत्यत्र चैत्रो भावनाविशेष्यः तंदुल

निष्ठः विक्लित्त्यनुकूलव्यापारजनकत्वसाश्रय इति चैत्रस्य विशेष्यत्वेन बोधात् अतस्तत्रैव संख्यान्वय इति चैत्रेण पच्यते तंडुल इत्यत्र तंडुलो भा
वनाविशेष्यं चैत्रनिष्ठकृतिजन्यव्यापारजन्यफलाश्रयस्तंडुल इति तंडुलस्य परंपरया भावनाविशेष्यतया बोधात्। अतस्तत्रैव संख्यान्व
य इति चेत् न। संख्याभावनयोरेकप्रत्ययोपात्तत्वप्रत्यासत्तेस्तुल्यत्वेन भावनाविशेष्य एव संख्यान्वयः ननु विशेषणा इति निर्बंधस्य नियामक
विशेषाभावेनायोगात्। किंच तिङः कर्तृकर्मवाचकत्वाभावे पचतीत्यत्र प्रथमा पच्यत इति अत्र च प्रथमा च न स्यात्। तयोः कर्त्रादिवाचके सार्व
धातुके विहितत्वात्। देवदत्तः पचतीत्यत्र अनभिहिताधिकारीया तृतीया पच्यते तंडुल इत्यत्र अनभिहिताधिकारीया द्वितीया
च स्यात्। न च कर्त्रादिसंख्यायां तिङा अनभिहितायां कर्तृकरणयोस्तृतीया कर्मणि द्वितीयेति सूत्राभ्यां तृतीयाद्वितीययोरभिधा
नात्। प्रवृत्ते च तिङा कर्मकर्तृसंख्ययोरभिधानात्। कर्तृप्रयोगे कर्तरि न तृतीया कर्मप्रयोगे च न कर्मणि द्वितीयेति वाच्यं कृत्तद्धि
तसमासानां संख्यानभिधायकत्वेन तत्समभिव्याहारात्। तिङ् कृत्तद्धितसमासानुक्ते कर्तरि तृतीया अनुक्ते कर्मणि द्वितीयेति कर्तृ
करणयोस्तृतीया कर्मणि द्वितीयेति सूत्रयोरर्थस्य वक्तव्यत्वात्। अन्यथा कृतः घटः शत्यः कटः। शातिकः कट इत्यादौ कृत्तद्धिता

ध्यां कर्मसंख्याया अनभिहितत्वेन द्वितः घटः शास्त्रःकट इत्यादिप्रयोगप्रसंगः। किं च पचतीत्युक्ते क इति कर्तृविशेषजिज्ञासा पच्य
त इत्युक्ते किमिति कर्मविशेषजिज्ञासा च न स्यात्। तिङः कर्तृकर्मणोः सामान्येनानभिधानात्। ननु न कर्तृकर्मणोर्लकारवाच्यत्व
मभ्युपगंतुं शक्यः पचेतेति विधिलिंङर्थेष्टसाधनत्वस्य कर्तृनिष्ठतयाबोधप्रसंगात्। एकप्रत्ययोपात्तत्वप्रत्यासत्त्या कर्तुरेवां
तरंगत्वात्। धात्वर्थयाकादेः इष्टसाधनत्वबोधो न स्यात्। तथा च प्रवृत्तिर्न स्यादिति चेन्न। आत्मेष्टसाधनत्वस्य सिद्धत्वेन तद्बोध
ने तात्पर्यविरहात्। तात्पर्यानुसारेणायागगतेष्टसाधनत्वस्यैव लिंङा बोधनात्। अन्यथा कर्त्रादिसंख्यैव आख्यातेनोच्येति वा
दिनो मते वियत्रसंख्यान्वयः तत्रैवेष्टसाधनत्वान्वयः स्यादिति यागादिनामिष्टसाधनत्वबोधो न स्यात् नन्वथापि कर्तृकर्मणो
नाख्यातशक्ते॥ तयोर्देवदत्ततंडुलादिपदलभ्यत्वात्। अनन्यलभ्यस्यैव शब्दार्थत्वादिति चेन्न। देवदत्तत्वादिरूपेणान्यलभ्य
त्वात्। तेन रूपेणाशक्यत्वाभावे पि कर्तृत्वादिरूपेणाशक्यत्वस्यावक्तव्यत्वात्। तेन रूपेणान्यलभ्यत्वाभावात्। अन्यथा चित्रगुर्देव
दत्त इत्यत्र अन्यपदार्थे त्वदुक्ता लक्षणा न स्यात्। अन्यपदार्थस्वामिनो चित्रगुर्देवदत्त इति प्रयोगांतर्गतदेवदत्तपदलभ्यत्वात्।

संख्याप्याख्याताभिधेयानस्यात्।तस्यापिनामोत्तरसुक्लभ्यत्वात्।नन्वाख्यातस्ययदिव्यापारविशिष्टेशक्तिः तर्हियागस्यविष
यतयासाध्यतयावाव्यापारान्वयोनस्यात्।शाब्दार्थस्यान्यविशेषणतयाविज्ञातेनशाब्दार्थैकदेशेनान्वययोगात्।इतिचेन्न॥पदांत
रव्युत्पत्तितोविलक्षणयाख्यातव्युत्पत्त्यान्यविशेषणतयाविज्ञातेनशाब्दार्थैकदेशेनापिअन्वयबोधसंभवात्।देवदत्तस्यनप्तेत्य
त्रनप्तृपदार्थस्यपुत्रपुत्रैकदेशेनपुत्रविशेषणेनापिपुत्रेणदेवदत्तस्यान्वयदर्शनात्।देवदत्तादन्योयज्ञदत्तइत्यत्रयज्ञदत्तविशे
षणतयाविज्ञातपदार्थैकदेशभेदंप्रतिदेवदत्तस्यप्रतियोगित्वेनान्वयदर्शनात्।चाएवंचदेवदत्तःतंडुलंपचतीत्यस्यतंडुल
कर्मकपाककर्तादेवदत्तइत्यर्थः।पाककर्तृदेवदत्तयोरभेदान्वयबोधात्।देवदत्तेनपच्यतेतंडुलइत्यस्यदेवदत्तकर्तृकपाककर्मतं
डुलइत्यर्थः।तंडुलपाककर्मणोरभेदान्वयबोधात्।देवदत्तेनसुप्यतइत्यस्यदेवदत्तकर्तृकःस्वापइत्यर्थः।संख्यात्वेनन्वितेव॥स्वा
पस्यद्वित्वबहुत्वेपिसुप्यतइत्येवप्रयोगात्।एकवचनंतुप्रयोगसाधु अचेतनेमध्यमोत्तमप्रयोगोनभवतःयुष्मदस्मच्छब्दाविषयत्वात्।
यदाचेतनेउपचारेणयुष्मदस्मच्छब्दप्रयोगोभवतःतदातदनुबंधिनौमध्यमोत्तमप्रयोगावप्युपचारेणभवतः॥ ॥इत्याख्यात

अ.न.ता.
१२५
125

निरूपणं॥ ॥उदयनस्तु। आख्यातस्य यत्नवाचकत्वात्। रथो गच्छतीत्यादिप्रयोगांतर्गताख्यातस्य व्यापारे लक्षणा। आख्यात
स्य यत्नवाचित्वमेव कुतः इति चेदुच्यते। पचतीत्युक्ते पाकं करोतीति यत्नार्थकं करोतिना आख्यातविवरणात् असतिबाधे दृढस्य
व्यवहारवत्। विवरणस्यापि दृढव्यवहारहेतुत्वात्। किंच करोतीति प्रश्नेः पचतीति प्रतिवक्तारो भवंति न चाख्यातस्य यत्नवाचित्वा
भावे किमनुकूलत्वानिसंधिप्रयुक्तस्य किं करोतीति प्रश्नस्य पचतीत्युत्तरं युज्यते पाकानुकूलयत्नप्रतिपादकत्वात्। इत्याह तन्न।
देवदत्तः यज्ञदत्तं जानाति तिष्ठति देवदत्त इत्यादौ आख्यातेन यत्नस्याप्रतीयमानतया तस्य यत्नार्थत्वायोगात्। न चाख्यातो
मुख्यार्थः किंतु निरूढलक्षणया तात्पर्यार्थक इति वाच्यं मुख्यार्थानुपपत्तिप्रतिसंधानसध्रीचीनतयाप्रतीयमानत्वात्।
यदपि रथो गच्छतीत्यादौ आख्यातस्य व्यापारे लक्षणेति तत्र वक्तव्यं किं रथनिष्ठो गमनरूपव्यापार एवाख्यातेन लक्ष्य उत गमनानु
कूलोन्यः। नाद्यः धातुनैव तस्यावगतत्वेन लक्षणावैयर्थ्यात्। नापि द्वितीयः। रथे प्रयत्नवत्। गमनानुकूलव्यापारस्याप्यभावात्।
अथ तत्र गमनानुकूलः परिस्पंदरूपो व्यापारोभ्युपगम्यते तर्हि रथः परिस्पंदत इति प्रयोगः सिद्ध्येत् नत्वादि परिस्पंदानुकूलो व्या

रा.म.
१२५

पारोक्ष्यग्रंतव्यः स्यात्।तत्राथेवमित्यनवस्था।अथतत्रपरिस्पंदनइत्यत्रचप्रकृत्यर्थएवव्याख्यातार्थइतिचेन्न।पकृप्रसंगात्।यद्भाव
प्रसंगाच्च।सार्वधातुकेयगितिसूत्रेणभावकर्मणोश्चिनिसार्वधातुकेयकोविधानात्।यदपिपचतीत्यस्यपाकंकरोतीतियत्नार्थक
करोतिनाव्याख्यानविवरणात्।व्याख्यानस्ययत्नार्थत्वकमिति।तदपिन।पाकंकरोतीतिकरोतिनापाककर्मकक्रियाश्रयत्वस्यैवाभिधानेन
यत्नेव्याख्यानाभिधानात्पाकानुकूलव्यापारंदृष्ट्वैवपाकंकरोतीतिप्रयोगात्।।यदपिकिंकरोतीतिप्रश्नस्यपचतीतिप्रतिवचनान्यथानुप
पत्त्याव्याख्यातस्यकृतिवाचकत्वमिति।तदपिन।किंकरोतीतिप्रश्नस्यकिंविधक्रियाश्रयइत्यर्थत्वेनपाकानुकूलव्यापाराश्रयइत्युत्तरसं
भवात्।अतएवकिंकरोतिपश्यतीतिवक्तारोभवंतिनहितत्पक्षेकिंकरोतीत्यस्यव्याख्यातार्थस्यपश्यतीत्युक्तिःसंभवतिपरकीययत्नस्यातीं
द्रियत्वात्।ननुघटांकुरयोःक्रियाजन्यत्वेसमानेपिघटःकृतःअंकुरोनकृतइतिव्यवह्रियतेनचतद्वैलक्षण्यमंतरासंभवतीति
यत्नजन्यत्वाजन्यत्वाभ्यामेववैलक्षण्यंवाच्यमितिकृञोयत्नार्थकत्वसिद्धिः।किंचकृञोयत्नार्थकत्वाभावेकर्तृपदंक्रियाश्रयमा
त्रमभिदध्यात्।ततश्चकारकांतरेपिकर्तृपदप्रयोगःस्यात्।नचैवमपिकर्तृपदंकृत्याश्रयाभिधायकमित्यस्मत्पक्षेपंततश्चकृञोय

त्वार्थकत्वमवर्जनीयमिति तेन सर्वाख्यातविवरणात्। आख्यातस्य यत्नार्थकत्वमिति चेत् न। यत्नाभावेपि वीजेनांकुरः कृतः स्व
गादिना सुखं कृतमिति प्रयोगदर्शनेन यत्नजन्यत्वाजन्यत्वाभ्यां कृताकृतव्यवहारविभागीकारात् प्रयोगात् कर्तृपदस्य कृत्याश्रये रूढेरं
गीकर्तुं शक्यत्वेन तद्बलात्। कृत्योपत्वार्थकत्वांगीकारायोगाच्च॥ ॥इति उदयनोक्ताख्यातार्थनिरूपणभंगः॥ ॥भाट्टास्तु म
न्यंते। आख्यातस्य धात्वर्थानुकूलो व्यापारो वाच्यः। चेतनाचेतनयोर्धात्वर्थानुकूलव्यापारसद्भावात्। देवदत्तो गच्छति इत्यादाविव रथो
गच्छतीत्यादावपि आख्यातो मुख्य एव। न च पथि श्रमशयानेपि पचतीति प्रयोगः स्यात् अत्र मशीतिद्वाराशयनस्य पाकानुकूलत्वादि
ति वाच्यं व्यापारविशेषस्यैवाख्यातवाच्यत्वांगीकारात्। न चैवं सति पचति इत्युक्ते पाकानुकूलप्रयत्नप्रतीतिर्न स्यादिति वाच्यं॥ धा
त्वर्थविशेषेण तदाक्षेपसंभवात्। न च पचतीत्यस्य पाकं करोतीति विवरणात् यत्न एवाख्यातार्थ इति वाच्यं आक्षेपलभ्यस्य प्रय
त्नस्य विवरणं करोतिनाक्रियत इत्यंगीकारात्। इति तन्न। लः कर्मणि च भावे चाकर्मकेभ्य इति स्मृतिविरुद्धत्वात् तस्मात् कर्तृकर्मभावा
नामाख्यातवाच्यत्वस्य विस्पष्टमुक्तत्वात् रथो गच्छतीत्यादौ धात्वर्थानुकूलव्यापाराभावाच्च। न हि रथे गमनानुकूलो व्यापारो दृश्यते येन

तत्प्रतिपादनेनाख्यातं तस्य मुख्यार्थत्वं स्यात्। किंच घटो यजायतइत्यत्र घटेऽप्यनुकूलव्यापाराभावेन जायतइत्याख्यातप्रयोगो न
स्यात् न च तत्रानुत्पन्नो घटः जन्यानुकूलव्यापारवान्यनेन तत्प्रतिपादनेनाख्यातो मुख्यार्थः स्यात् गौणोयं प्रयोगइति चेन्न। रथो गच्छ
तिइत्यपि तथात्वं किं चाख्यातस्य नानार्थत्वमहाय सर्वत्रापि धात्वर्थानुकूलव्यापारस्यैवाख्यातार्थत्वांगीकारे पचतीत्यादौ शप्
पच्यतइत्यादौ यगिति विभागश्च न स्यात्। देवदत्तइति प्रथमा च न स्यात् तिङा कर्तुरनभिधानात्॥ ॥इति भाट्टोक्ताख्यातार्थभं
गः॥ ॥मणिकारस्तु मन्यते॥ ॥चैत्रः पचतीत्यत्र पाकानुकूलयत्नानुभवात्स एवाख्यातार्थः। लाघवात्। न त्वनुकूलो व्यापारः।
यत्नत्वापेक्षया व्यापारत्वस्योपाधित्वेन गुरुत्वात्। न चाचेतने व्याख्यातस्य मुख्यत्वार्थमनुगतो व्यापार एव शक्यः मुख्यत्वसंभवे
न तत्प्रयोगादिति वाच्यं शक्तिग्राहकेण लघुनि शक्तिपरिच्छेदात्। न च रथो गच्छतीत्यादावाख्यातेनाचेतने व्यापारावगमात् व्या
पारस्यैव वाच्यत्वमिति वाच्यं। गौणतया शक्तिभ्रमेण वा तत्राख्याताद्व्यापारावगमोपपत्तेः यत्नविगमदशायां तज्जन्यव्यापार
काले पचतीत्यत्र वर्तमानव्यापाराभिधानमाख्यातेन लक्षणया रथो गच्छतीत्यत्रेव तस्मात्कृतावाख्यातं यत्नवाचकं आख्यातत्वात् लि

ङाख्यातवत्पचतिपक्ष्यत्यपाक्षीदित्यादौ अतीतानागतवर्तमानयत्नप्रतीतस्य यत्नएवाख्यातवाच्यः। तेनयत्नस्यवर्तमानत्वादि
कमाख्यातेनाभिधीयतेप्रकारांतरेणतद्लाभादिति। तन्न। चैत्रः पचतीत्यनेन नमचैत्रः पाकानुकूलव्यापारवानित्यनुभवस्यसर्वानु
भवसिद्धत्वेनाख्यातस्य यत्नानुभवजनकत्वात् यत्नेशक्तिरित्यस्य प्रयोगात्। किंच पचतीत्याख्यातेन यत्नः फलत्वेन प्रतीयते॥ उत
व्यापारत्वेन नाद्यः लाघवोपन्यासवैयर्थ्यात् आख्यातेन व्यापारत्वस्य प्रतीत्या तस्याख्यातशक्यतावच्छेदकत्वप्रसक्त्यभावात्। नापि
द्वितीयः। व्यापारत्वेन यत्नप्रतीतौ लाघवस्य शक्यतावच्छेदकताबाधकत्वेन लाघवोपन्यासवैयर्थ्यात्। नहि येन शब्देन यत्नः प्रती
यते तत्स्वरूपभूतमित्येतावता तच्छक्यतावच्छेदकं भवति किंचाख्यातस्य यत्नार्थत्वे पचतीत्यत्र शप् न स्यात्। कर्तुस्तिङाभिहितत्वे
न देवदत्त इति प्रथमा न स्यात्॥ अपि तु तृतीया स्यात् पच्यत इत्यत्रापि यक् न स्यात्। तंडुल इत्यत्र प्रथमा न स्यात् कर्मणस्तिङन
भिधानात् द्वितीया स्यात्। ननु पचतीत्यत्राख्यातेन कर्तृसंख्योच्यते पच्यते पच्यत इत्यत्र कर्मसंख्योच्यते तत एव पचतीत्यत्र शप् पच्य
त इत्यत्र यक् कर्तरि देवदत्ते प्रथमा तृतीयाभावः। तंडुले कर्मणि प्रथमा द्वितीयाभावश्चोपपन्न इति चेन्न। देवदत्तपदवाच्यस्य

मुख्यविभक्तिबोध्यसंख्यावद्द्रव्यत्वेनाख्यातस्य तद्गतसंख्याभिधायकत्वायोगात् न च नीलमुत्पलमित्यत्र नीलपदोत्तरविभक्तेः उत्पल
शब्दार्थसमवेतसंख्याभिधायकत्ववत् उपपत्तिरिति वाच्यं। नीलपदोत्तरविभक्तेः नीलपदार्थगतसंख्याबोधकत्वेन वैषम्यात्। संख्या
विशिष्टनामार्थयोः परस्परमभेदबोधेन संख्ययोरैक्ये स्यात्॥ न तत्र संख्याद्वयप्रसंगः। यदपि लडाख्यातं यत्नवाचकं आख्यातत्वात्।
लिङाख्यातवदिति तदपि न। लिङाख्यातस्यापि भावनापरपर्यायव्यापारमात्रवाचित्वात् यदपि चैत्रेण पच्यते तंडुलः रथेन गम्य
ते ग्राम इत्यत्र तंडुलग्रामौ कर्मणी प्रतीयेते अस्ति च तयोः क्रियाफलशालित्वलक्षणं कर्मत्वं तच्चाख्यातवाच्यमेव तंडुलं पचतीत्यत्र
द्वितीयांतइवाख्यातः। कर्मत्वालाभात्। तस्मात्कर्मत्वमेव लकारवाच्यं॥ न तत्र धर्मिभूतं कर्मतस्याख्यात एव लाभादित्युक्तं तदपि न। प्रकृ
त्याप्रत्ययेन वा धर्मिणोऽनुक्तौ प्रत्ययार्थस्य कर्मत्वस्यानन्वयापातात्। किंच पच्यते इत्यनेन सामान्यतः कर्मानुक्तौ किमिति कर्माकांक्षा न
स्यात्। आख्यातोक्तं। कर्मत्वं कुत्रेत्याकांक्षाप्यात्॥ ॥इति मणप्रकाख्यातार्थभंगः॥ ॥धिरोमणिस्तु आख्यातस्य यत्नो वाच्यः पच
तिपाकं करोतीति यत्नार्थककरोतिनाख्यातविवरणात्। व्यवहारादिवत् बाधकं विना विवरणादपि प्रसक्तेः किं करोतीति य

त्वप्रश्नेपचतीत्यत्रास्यपत्यार्थकत्वं विनानुपपत्तेश्च यथनिष्टगमनानुकूलव्यापारवतिनेतरिगच्छतिस्यप्रयोगात्।गच्छतिजा
तिइच्छतिपततेद्वेष्टिविद्यतेनिद्रातीत्यादौ।क्रियानुकूलकृतिव्यापारयोरप्रतीतेः।गत्यादिमत्वमात्रप्रतीतेश्चाश्रयत्वेनिरूढलक्ष
णातत्वाश्रयत्वंधात्वर्थनन्वेतिनतत्रजानातीत्यादौज्ञानाद्याश्रयत्वमर्थः।नश्यतीत्यादौचाख्यातस्यप्रतियोगिनिरूढलक्षणा।त
नतश्चनश्यतीत्यस्यनाशप्रतीयोगीत्यर्थकृञोयत्नाभिधायकत्वमेवकुतः येनकरोतिनासर्वाख्यातविवरणात्।आख्यातस्य
यत्नोर्थस्यादितिचेत्उच्यते।अस्तितावत्परांकुरयोः कृताकृतव्यवहारः नचासौक्रियाजन्यताजन्यत्वाभ्यामुपपद्यतेउ
भयोरपिक्रियाजन्यत्वात्।विद्येतेचयत्नजन्यत्वाजन्यत्वेपटांकुरयोस्ततस्तत्प्रयुक्त एवायंव्यवहारइतिकृञोयत्नवाचित्वंआ
श्रयपरत्वजंतत्रात्रादिपदवत्।कर्तृपदस्यकृत्याश्रयबोधकत्वाच्च।कृञोयत्नवाचकत्वं॥अन्यथाकारकमात्रेकर्तृपदप्रयो
गःस्यादित्याहतत्रा।किमयंघटंकरोतिउतघटोस्ततयेयततेइतिप्रश्नान्यथानुपपत्त्यानयततोऽपितुघटंकरोत्येवेतिप्रतिव
चनवलाच्च।करोतेःकृतिवाचित्वाभावेनकरोतिनाक्रियमाणविवरणवशेनाख्यातस्यकृतिवाचित्वांगीकारायोगात्।किंचक

चक्रोते यदि यत्नार्थकत्वं स्यात्तदा तर्हि रथो गच्छतीत्याख्यातस्य करोतिना विवरणं न स्यात्। न हि अग्निर्माणवक इति गौणप्रयोगस्य
माणवको वह्निरिति विवरणं क्रियते। किंतु अग्निसदृशः इति। येनेह करोतेर्यत्नार्थकत्वे यत्नाप्रतिपादकाख्यातविवरणं करोतिनो
पपन्नं स्यात् किं च करते रथ आख्यातस्य च यत्नार्थकत्वे करोतीति प्रयोगो न स्यात्। आख्यातस्य धात्वर्थरूपभावनाचित्वेनात्मनेपदस्य य
कृष्वभावत्वात् कुरुतः कुर्वतीति द्विवचनबहुवचने न स्याताम्। सकर्मकत्वं च न स्यात्। अकर्मकादेव भावे लकारविधानात्। न च कर
रोतीत्याख्यातस्य न यत्नार्थत्वं अपि तु कर्मसंख्यामात्रवाचित्वमेव अतो नोक्तदोष इति वाच्यं क्रियते पतन इति प्रयोगात्। तत्र य
त्नार्थकत्वाभावेन तत्संरक्षणाय कृतेरत्र आख्यातस्य प्रयोगसाधुत्वांगीकारे योगात्। संख्यान्वयाभावापाताच्च॥ आख्यातोक्त
संख्यायाः भावनाविशेष्यान्वयित्वस्यत्वयांगीकारात् [illegible] किंच पचतीत्याख्यातस्य कर्तृवाचित्वाभावे देवदत्तपदे तृतीयाप्रसंगः
पच्यते इत्यत्र कर्मवाचकत्वाभावे तंडुलपदे द्वितीयाप्रसंगश्च स्यात्। तयोरनभिहिताधिकारीयत्वात्। न च पचति पच्यते इत्यत्र कर्तृकर्मणोरन
भिधानेपि तत्संख्याभिधानात्र द्वितीयातृतीयाप्रसंग इति वाच्यं देवदत्तः ओदनं पचतीत्याख्यातेन कर्तृसंख्येवोक्ता। न कर्मसंख्येति कारणाभि

शेषमंतरानियमायोगात्। अत्र वदंति केचित्। भावनाविशेष्ये संख्यान्वयः। उपयोग्यत्वात्ख्यातोक्तत्वात्। देवदत्तः पचतीत्यत्र देवदत्तो भावनावि
शेषः तंडुलनिष्ठविक्लित्त्यनुकूलया पाकविषयकभावनाश्रयो देवदत्त इति प्रत्ययात्। अतः पचतीत्यत्रोक्ता संख्या देवदत्तेन्वेति पच्यत इत्य
त्र तंडुलो भावनाविशेष्यः। मैत्रनिष्ठभावनाविषयपाकजन्यफलशाली तंडुल इति प्रतीतेः अतः संख्या तंडुलेन्वेतीति तदसहमानाः त्वन्य
स्तु चैत्रेण पच्यते तंडुल इत्यत्र भावनाख्यातलभ्या। आधेयत्वं तृतीयार्थः भावनाविषयपाकस्तु धातुलभ्य इति चैत्रनिष्ठभावनाविषयपा
क इति शाब्दबोधसंभवेपि पाकजन्यफलशाली तंडुल इति कथं भवेत् फलप्रत्यायकाभावात्। पच्यत इत्यात्मनेपदार्थः फलमिति चेदत्र व
क्तव्यं किं भावनायाः फले अन्वयः उत क्रियायाः नाद्यः। पाकविषयमैत्रनिष्ठभावनाजन्यफलशाली तंडुल इत्येव शाब्दबोधप्रसंगेन क्रिया
जन्यत्वबोधाभावप्रसंगात्। नापि द्वितीयः तिङुपस्थापितभावनायां क्रियाया विशेषणत्वेनान्यत्र [illegible] क्लृप्तान्वयनियमभंगप्रसंगात्। तस्मात्
मैत्रनिष्ठभावनाविषयपाकजन्यफलशाली तंडुल इति शाब्दबोध एवमुपपादनीयः। कर्तरि प्रयोगे भावनाख्यातोक्ता कर्मणि प्रयोगे तु क
र्तृवाचकप्रातिपदिकोत्तरतृतीयोक्ता। न चास्तु यः भावनाया नाचित्वं नेति वाच्यं। कृत्यनभिधायकभावकृद्योगे चैत्रस्य पाक इति षष्ठ्याः चैत्रेण

पाकात्तंडुलादिस्थत्रततीयायाः भावनाशक्तेः क्लृप्तत्वात्। अन्यथा चैत्रपाकयोरन्वयबोधो न स्यात्। तदन्वयस्य भावनाद्वारकत्वात्। ननु चै
त्रभावनाविषयककथकजन्यफलशालीतंडुल इति बोध उपपन्नः। सुवर्थकृतेः क्रियायां विशेषणत्वेनैवान्वयस्य व्युत्पन्नत्वात्। न च यदि क
र्मणि प्रयोगे णत्वाख्यातोक्तभावनातत्त्वाख्यातोक्तसंख्यायाः कर्मान्वयो न स्यात्। सुवुक्तभावनायामाख्यातोक्तसंख्यायाश्चैकप्रत्ययोपात्त
त्वप्रत्यासत्त्यभावेन सुवुक्तभावनाविशेष्ये संख्यान्वयो भवतीत्यस्यांगीकर्तुमशक्यत्वात्। इति वाच्यं तिङ्पदस्थाप्याभावनायाः इव तिङ्
पस्थापितसंख्याया अपि प्रथमांतपदोपस्थाप्ये नैवान्वय इति व्युत्पत्तिबललभ्यत्वात्। इति वदंति। तेन। कर्मणि प्रयोगे आख्यातेन
संख्यामात्राभिधाने तंडुलादौ कर्मणि द्वितीयाप्रसंगात्। तस्यानभिहिताधिकारीयत्वात्। फलाभिधानानभिधानाभ्यां द्वितीयादिनियम
स्य कर्मणि द्वितीयेत्यादिस्मृतिविरुद्धत्वात्। तंडुलशब्दे प्रथमाया एवायोगेन प्रथमांतपदस्यापेक्षाख्यातोक्तसंख्याया अन्वये पुर्या
पातात्॥ ॥इति शिरोमणिकृताख्यातार्थभंगः॥ ॥अथ क्रियाधात्वर्थः। भुवादयो धातव इति धातूनां क्रियावाचित्वस्मरणात्। क्व
चिद्रूपमपि धात्वर्थः। गडिवदनैकदेशे इति धातुव्याख्यानात्। तथाहि। पचेः संपतनविशेषः गमेर्ग्रामादिप्राप्तिसाधनीभूता चलना।

ध्व०ना०
१३०
130

त्मिका क्रिया । पतेरर्थः संयोगहेतुभूता चलनात्मिका क्रिया । त्यजेर्विभागसाधनीभूता चलनात्मिका क्रिया । हंतेर्मरणानुकूलः खड्गादिघा
तरूपो व्यापारोऽर्थः । यजेस्तु मंत्रपूर्वकः देवतोद्देशको मनसस्त्यागो जुहोतेस्तु देवतोद्देशेन मनसा त्यक्तस्य हविषो योऽग्नौ प्रक्षेपोऽर्थः
। ददातेस्तु द्रव्यस्य परस्वत्वापादनहेतुभूता क्रिया रजकाय वस्त्रं ददाति खण्डिकोपाध्यायः शिष्याय चपेटिकां ददाति । इत्यादिप्रयोगस्तु गौ
णः । एवमन्येषामपि धातूनामर्थोऽप्रपंचनीयः । ननु पचादेः विक्लित्त्याद्यनुकूलसंतपनादिरर्थो वा तदनुसंतपनादिमात्रं । नाद्यः नागृही
तविशेषणन्यायेन विक्लित्त्यादेरेव धात्वर्थत्वापातात् । अन्यथा गौरवं न द्वितीयः । रजकादिना क्रियमाणस्य आतपे वस्त्रप्रसार
णादेरपि पच्यर्थत्वप्रसंगात् । न च विक्लित्त्यादिफलोपलक्षितसंपतनादेरेव पच्यर्थत्वान्न दोष इति वाच्यं उपलक्ष्यतावच्छेदकरूपा
परिचये पुनरुक्तातिप्रसंगानिवारणात् । इति चेन्न । संतपनानंतरादिव्यावृत्तानुभवसिद्धविशेषावच्छिन्नसंतपनादेरेव पच्यादिधा
त्वर्थत्वांगीकारात् । जानाति इच्छति यतते विद्यते तिष्ठतीत्यादौ ज्ञानेच्छाप्रयत्नसत्तागतिनिवृत्तिरेव धात्वर्थः ज्ञा अवबोधने इषु इच्छा
यां यती प्रयत्ने विद सत्तायां ष्ठा गतिनिवृत्ताविति धातुव्याख्यानात् । प्रयोगवशादनेकार्था अपि धातवः प्रत्येतव्याः गत्यर्थानां ज्ञा

उ

राम०
१३०

नाद्यर्थत्वदर्शनात् उक्तं च क्रियावाचित्वमाख्यातुं एकैकोर्थः प्रदर्श्यते प्रयोगतोनुगंतव्याः अनेकार्था हि धातव इति इति धात्वर्थनिरू-
पणं॥ ॥मंडनमिश्रास्तु॥ ॥फलमेव धात्वर्थः॥ तथाहि॥ पच्यर्थो विक्लित्तिर्लाघवात्। ननु विक्लित्तिफलकोधः संतपनादिव्यापा-
रः। गौरवात्। गमेरुत्तरसंयोगः पतेरधःसंयोगः त्यजेर्विभागोर्थः। ननु तत्तत्फलानुकूलस्पंदः। हतेरपि प्राणमर्थः। ननु तत्फलकः। स्व-
ड्घातादिव्यापारः। यजेरपि देवतोद्देश्यकं त्यागफलं स्वत्वध्वंस एवार्थः। जुहोतेरर्थस्तु त्यागफलं प्रक्षेपः। दा त्यागफलं स्वत्वध्वंसः
परस्वत्वं॥ ननु तत्तत्फलकः त्यागो गौरवात्। न चैवं व्यापारविगमे फलदशायां पचति गच्छतीत्यादिप्रयोगः स्यात् न त्वपाक्षीदित्या-
दिव्यापारकाले च पचतीत्यादिप्रयोगो न स्यादिति वाच्यं धात्वर्थानुकूलत्वादेराख्यातार्थत्वेन व्यापारकाले पचतीति प्रयोगो भवति
नान्यदेत्युक्तिसंभवात् न च फलस्य धात्वर्थत्वे क्रियाजन्यफलशालित्वाभावात् तंडुलादेः कर्मत्वं न स्यादिति वाच्यं परसमवेतव्यापार-
फलशालित्वं हि कर्मत्वं स च व्यापारो धात्वर्थाख्यातार्थो वोभयथापि परसमवेतव्यापारफलशालिनस्तंडुलादेः कर्मत्वसंभवात्।
इत्याह॥ स्थूलदृष्ट्या॥ ॥फलस्यैव धात्वर्थत्वे विक्लित्तिसंयोगविभागमरणादीनामकर्मकत्वेन पचिगमित्यजिहत्यादीनामक-

[margin: र्पता]

पच्यादिधात्वर्थ

मैतापात्तात्।नचतद्दिष्टं पच्यते गम्यते त्यज्यते हन्यते इत्यादिप्रयोगाभावापात्तात्।लः कर्मणि च भावे चाकर्मकेभ्य इति सक
र्मकेभ्य एव धातुभ्यः कर्मणि लकारः नाकर्मकेभ्य इति नियमितत्वात्।यदपि पच्यर्थो विक्लित्त्यादिः तदपि सफलं पकर्मिता
दौपकशब्देन फलस्य पचिकर्मतापाद्ग्रामो गम्यः गत इत्यादिना ग्रामस्य गतिकर्मतापात्तस्त्यक्तो निषिद्धमित्यादौ निषिद्धस्य त्यजिकर्मता
पाः हतो देवदत्त इत्यादि हन्तिकर्मतापाः प्रतीयमानत्वेन विक्लित्त्यादेः जन्यफलत्वेन धात्वर्थत्वायोगात्।अन्यथा तज्जन्यफलशालिन
एव तत्कर्मत्वेन तंडुलादेः पच्यादिकर्मताभावप्रसंगः।यदपि परसमवेतव्यापारफलशालित्वं हि कर्मत्वं स च व्यापारो धात्वर्थ आ
ख्यातार्थो वेति उभयथापि परसमवेतव्यापारफलशालिनस्तंडुलादेः कर्मत्वं संभवतीति तदपि न।उक्तविधया तंडुलस्य कर्मत्वमात्र
स्युत्पादनेऽपि पचिकर्मतानुत्पादनात्॥ ॥इति मंडनमिश्रोक्तधात्वर्थनिरूपणभंगः॥ ॥प्रादयो गताद्यर्थाः प्रादयो गताद्यर्थे प्रथ
मयेति स्मृत्या गताद्यर्थवर्तमानानां प्रादीनां समासविधानात्।प्राचार्य इति समासेन गत आचार्य इत्यर्थप्रतीतेः।अत्यादयः क्रांता
द्यर्थाः।अत्यादयः क्रांताद्यर्थे द्वितीययेति क्रांताद्यर्थे वर्तमानानां अत्यादीनां द्वितीयांतेन समासविधानात्।अतिखट्व इत्यनेन खट्व

पच्यादिधात्वर्थ

ट्ठामतिक्रान्त इत्यर्थप्रतीतेः। अवादयः क्रुष्टाद्यर्थाः। अवादयः क्रुष्टाद्यर्थे तृतीययेति क्रुष्टाद्यर्थे वर्तमानानाम् अवादीनां समासविधा-
नात्। अवकोकिलो वसन्त इत्यनेनावकृष्टः कोकिलया वसन्त इत्यर्थप्रतीतेश्च। पर्यादयो ग्लानाद्यर्थाः। पर्यादयो ग्लानाद्यर्थे चतुर्थ्येति ग्ला-
नाद्यर्थे वर्तमानानां पर्यादीनां समासविधानात्। पर्यध्ययन इत्यनेन परिग्लानोऽध्ययनायेत्यर्थप्रतीतेश्च। निरादयः क्रान्ताद्यर्थाः। नि-
रादयः क्रान्ताद्यर्थे पञ्चम्येति क्रान्ताद्यर्थे वर्तमानानां निरादीनां समासविधानात्। निष्कौशाम्बिरित्यनेन निष्क्रान्तः कौशाम्ब्या इत्यर्थप्रती-
तेश्च। प्रजयति प्रयच्छतीत्यादौ धात्वर्थगतप्रकर्षप्रतीतेः उपसर्गप्रयोगान्वयव्यतिरेकानुविधायित्वात् प्रकर्षोपि प्रादेरर्थः। प्रहाराहा-
रसंहारविहारपरिहारा हरतेरर्थाः धातूनामनेकार्थत्वात्। उपसंसर्गिणामप्येत एवार्थाः। न च पौनरुक्त्यम् एको द्वौ वहव इत्यादौ प्रकृ-
ति प्रत्ययाभ्यां संख्यागोचरप्रतीतिजननात् पौनरुक्त्यंवत् इहापि धातूपसर्गाभ्यां प्रहारविषयैकतानजननेन पौनरुक्त्यसंभवात्।
इदमेव हि पौनरुक्त्यस्य दूषकता। बीजं यज्ज्ञातज्ञापकत्वं न चेह तदस्ति उभाभ्यां मिलित्वा एकस्य प्रत्ययस्य जननात्। अन्यथाऽस्यत
देवदत्तेन एको द्वौ वहव इत्यादावपि पौनरुक्त्यं स्यात्। एवं स्था धातुः। आराद्दूरसमीपयोरिति गतित्वं। वृत्तो वीचक्रः। प्रोपसर्गस्यापि

अ॰ न॰ ता॰
१३२
132

अनेकार्थत्वात् गतिरर्थः। ततश्च प्रतस्थे इत्यादौ धातूपसर्गौ मिलित्वा एकां गतिबुद्धिं जनयतः। अत एवास्मात् स्थधात्वर्थगतस्नि-
त्स्वार्थबोधकत्वमप्युपपन्नं। नचान्यतरवैयर्थ्यं सहभूतयोरेव गतिबुद्धिजनकत्वाभ्युपगमात्। एवमन्यत्रापि द्रष्टव्यं॥ ननूपसर्गवा-
चकः इत्युक्तं अनर्थकस्यापि निपातस्य प्रातिपदिकसंज्ञा वक्तव्येति वार्तिके प्रातिपदिकसंज्ञाविधानात् अन्यथा अर्थवदधातुर-
प्रत्ययः प्रातिपदिकमित्यनेन निपातानामपि प्रातिपदिकसंज्ञासिद्धिसंभवेन वार्तिकमनारंभणीयं स्यात् निपातानां निरर्थकत्वे तु
सूत्रेण प्रातिपदिकसंज्ञाप्रसंगात्। वार्तिकमिदमर्थवत् चेत्। इति चेन्न। केषांचिदुपसर्गाणां निरर्थकत्वमंगीकृत्य वार्तिकस्य प्रवृत्तत्वा-
त्। अवश्यं चैतदेवं विज्ञेयं वार्तिके कृते वानर्थकस्येति निपातविशेषणोपादानात्। उपसर्गमात्रस्य निरर्थकत्वे तु व्यावर्त्याभावा-
त्। अनर्थकस्येति विशेषणमनर्थकं स्यात्। अन्यथा प्रत्ययानामपि निरर्थकत्वं स्यात् प्रकृतेरेवार्थविशेषबोधशक्तिः प्रत्ययास्तु त-
च्छक्तितावच्छेदकाः इति वक्तुं शक्यत्वात्। नचाधिपरी अनर्थकौ सूत्रेणाधिपर्योरनर्थकत्वाभिधानात् उपसर्गाणां निरर्थकत्वमिति
वाच्यं। सूत्रस्यानर्थान्तरवाचिनौ अधिपरी कर्मप्रवचनीयसंज्ञौ भवत इत्यर्थत्वेन सर्वथा निरर्थकत्वस्यानभिमतत्वात्। उक्तं च-

ए म॰
१३२

हाभाष्ये नेनमावेवानर्थकौ किं तर्ह्यनर्थकाविस्युच्यते। अनर्थान्तरवाचिनौ अनर्थकौ धातुनोक्तां क्रियामाहतुः [illegible] तद्यथा शंखेप
यः गोस्तनगतमेवनान्यत। यद्येवं तर्हि धातुनोक्तत्वात्तस्यार्थस्योपसर्गप्रयोगो न प्राप्नोति उक्तार्थानामप्रयोग इति उक्तार्थानामपि
प्रयोगो दृश्यते अपूपौ द्वावानयेति। ननूपसर्गाणां वाचकत्वं सुधाविरुद्धं। अतिक्रमं वदंतं तमुपशाद्धो निवारयेदिति मूलव्याख्यान
सुधायामुपपूर्वस्य क्रमेः प्राप्त्यर्थत्वादिति धातोरेवउपसर्गोपसंदानेनार्थान्तराभिधानादिति चेन्न। धातूपसर्गयोः संभूय प्रा
प्ति विषयके कबोधजनकत्वस्य सुधाकृदभिमतत्वात् धातवो हि केचित् कस्यचिदर्थस्य स्वातंत्र्येणाभिधानसमर्थाः यथा जानाति
संजानातीति उपसर्गे सत्यसत्यपि स्वार्थाभिधानसमर्थो जानातिः अन्ये पुनः उपसर्गं विना अर्थान्तराभिधानसमर्था अपि अर्थविशेष
स्योपसर्गेणासहैवाभिधानसमर्थाः तद्यथा प्रतिष्ठत इति स्थाधातोः स्वातंत्र्येण गतिनिवृत्त्यभिधायकत्वेपि प्रोपसृष्टस्यैव गत्यभिधा
यकत्वस्यानुभवसिद्धत्वात्। दृश्यते हि लोके भारविशेषो द्वहनेसमर्थोपि देवदत्तः। भारांतरोद्वहने परसापेक्ष इति कथमन्यथा समन्व
याधिकरणेसोत्रसंप्रश्नार्थः सम्यगित्यभिदध्यात्। तदुक्तं भगवत्पादैः॥ ॥समिति उपसर्गेणाप्रयुक्तार्थ[illegible]च्यते। इति। उपसं

अ०न०ता०
१३२
133

क्रमणाचैव द्वितीयो देशितं प्रति। अतिक्रमं वदंतं तम् उपशब्दो निवारयेदिति च उक्तं च सुधायां संशब्दार्थः। सम्यग्गीति इति॥ प्र
इति उपसर्गार्थनिरूपणं॥ ॥समाप्तिकारकं॥ ॥द्योतका एवोपसर्गाः न वाचकाः। द्योतकत्वं च धातोरर्थविशेषे तात्पर्यग्राहक
त्वं धातोरर्थविशेषे तदुपसंदाने वशक्तिर्वा धात्वर्थस्योपसर्गेणाप्यभिधाने पौनरुक्त्यापातात्। किं च प्रतिष्ठत इत्यत्र उपसर्गस्य प्र
कर्षार्थत्वे प्रकृष्टगतिनिवृत्तिबोधः स्यात्। तस्या च गतिबोधः। न चानेकार्थत्वादुपसर्गाणां गतिः प्रोपसर्गार्थ इति युक्तं धातुवैयर्थ्यापा
तात्। न च साधुत्वार्थं धातुप्रयोग इति युक्तं। आख्यातस्य प्रकृत्यर्थान्वितस्वार्थबोधकत्वनियमेनाख्यातार्थस्योपसर्गार्थे गतस्यानन्वयापा
तात्। एवं च प्रोन्नतस्थले गमने शक्तिरिति प्रशब्दन्तात्मकावच्छेदको न शक्य इत्यौपसंदानकी शक्तिरेव अथवा प्रतिष्ठत इत्यत्र विशेषि
लक्षणया धातोर्गमनोपस्थितिः तात्पर्यग्राहकः प्रशब्दः अनन्यलभ्यस्य शब्दार्थत्वात्। प्रजयतीत्यादावपि विशेष्यवाचकस्य धातोर्विशि
ष्टे लक्षणैव विशेष्याद्विशिष्टस्यान्यत्वात्। प्रादेस्तात्पर्यग्राहकत्वं न हि शक्तिं विना धातुतः प्रतीति संभवेत् तत्कल्पनमपि नहि। अनन
लभ्यस्य शब्दार्थत्वात्। इत्याह। स स्थूलदेश्या॥ ॥लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः इति सूत्रस्थोपसर्गाणां वाचक

पि
एम०
१३२

त्वस्य निषेधात्। यदपि तदुपसंदानेन धातोरर्थविशेषे शक्तिर्वेति तदपि न। उपसर्गस्य शक्त्युपसंधानशक्तिकल्पनेपेक्षया आवयोर्द्वा
यसिद्धवाचकत्वकल्पनस्यैवोचितत्वात्। अन्यथा विभक्त्युपसंदानेन प्रातिपदिकस्यैव कर्मत्वादौ शक्तिः न विभक्तेरिति स्यात्। यदपि
धात्वर्थस्योपसर्गेणाप्यभिधाने पौनरुक्त्यापात इति तदपि न। एको द्वौ बहव इत्यादौ प्रकृत्यर्थस्यैकत्वादेः प्रत्ययेनाभिधानेऽप्यपौनरुक्त्य
वत्। इहापि धातूपसर्गाभ्यामेकार्थविषयकैकप्रतीतिजननेनापौनरुक्त्यसंभवात्॥ यदपि प्रतिष्ठत इत्यत्र प्रेत्युपसर्गस्य गत्यर्थकत्वे
आख्यातार्थेऽन्वय इति॥ तदपि न। धातोरपि गतिवाचकत्वेन धात्वर्थस्य गतेः आख्यातार्थान्वयसंभवात्। अधात्वर्थेनापि कर्त्रादिना आ
ख्यातार्थसंख्यायाः अन्वयस्य त्वयैवाभिधानाच्च। यदपि॥ प्रतिष्ठत इत्यत्र स्थाधातोरेव विरोधिलक्षणया गमनोपस्थापकत्वमिति॥ त
दपि न। मुख्यार्थानुपपत्तिप्रतिसंधानपूर्वकं गतिप्रतीतेरजननात् प्रयोगतोऽनुगंतव्या। अनेकार्था हि धातव इति वचनबलेन शक्ते
रेवाभ्युपगंतुं शक्यत्वात्। न च तिष्ठतीत्यत्रैव गतिप्रतीत्यापत्तिः प्रोपसृष्टस्यैव स्थाधातोर्गतिप्रत्यायकत्वस्वभावांगीकारात्। अवान
न्यलभ्यस्यैव शाब्दार्थत्वात् स्थाधातोर्गतौ लक्षणैव न शक्तिरिति युक्तं स्थाधातुना गतिबोधनाय प्रवृत्तेन नियमतः प्रोपसर्गोपादानाभा

अन॰ ता॰
१३४
134

वप्रसंगात्। अत एव प्रजयतीत्यादौ विशेष्यशक्तस्याभिधानतो विशेष्ये लक्षण्यैवेत्यपि निरस्तं॥ ॥पक्षधरस्तूपसर्गस्यावाचकत्वे निपा
तस्यानर्थकस्येति सूत्रं न क्रियेतार्थवादादिसूत्रे गौरवापत्तिर्यदि क[illegible]लाभात्। प्रपंचकत्वकल्पनायां गौरवादिति आह॥ ॥तत्स्थूल
दृष्ट्या॥ वार्त्तिकस्य सूत्रत्वाभिधानात्। वार्त्तिके त्वापि अनर्थकस्येति निपातविशेषणमहिम्ना उपसर्गेष्वपि सार्थकत्वानर्थकत्वविभागस्य
लाभे। न निपातमात्रस्यानर्थकत्वप्रपंचस्य च। अर्थवद्धातुरिति सूत्रस्य निपातस्यानर्थकस्येति वार्त्तिकस्य च विरुद्धार्थत्वे न प्रपंच्य
प्रपंचकाभावप्रसक्त्यभावेन प्रपंच्यप्रपंचकभावमाशंक्य निषेधाच्च अविद्यमानगौरवसोपान्यासाच्चान हि प्रपंच्यप्रपंचकभावस्य
लगौरवमस्ति॥ प्रस्तुत॥ एकस्यैव शास्त्रस्य विविधत्वे न लाघवमेवास्तीति गौरवाभिधानमेव भ्रममूलकं॥ ॥

३

भावेनान्वयवोधानुत्पादनात्। नचपदैकदेशविभक्तिविशेषादिवद्वेष्टैकदेशविशेषात्। तदुपस्थितिरितिवाच्यं। पदेषुविभक्तिरू
पैकदेशवच्चेष्टायाः कर्मत्वाद्युपस्थापकैकदेशाभावात्। कथंतर्हि चेष्टातोव्यवहारः संशयप्रतिभयोरन्यतरस्मात्। तस्मान्नचेष्टा
प्रामाण्यं। चैतित्यंचोक्तिलेनशाद्वएवांतर्भूतं। अर्थापत्त्यनुपलब्ध्योश्चयथायथमंतर्भावः प्रागेवचितितः। अतसिद्धं चत्वारिप्रमाणा
नीत्युपराप्रजइत्याह॥ ॥तस्थूलदर्था॥ ॥अनपाचेष्टयाअपमर्थोवोद्धव्यः। अनयाइयंक्रियावोद्धव्याइत्येवंविधस्यचेष्टासंकेतप्रा

हकशब्दस्य वृत्तिहेतुज्ञानजनकात् घटमानयेति शब्दादन्यत्वेन तत्स्मारणस्यानपेक्षितस्यैव अभिधानात्। चेष्टायाः संकेतग्राह
कशब्दस्मारकत्वक्षिप्यर्थे लिपिदृष्टान्ताभिधानायोगात्। नहि लिपिः संकेतग्राहकशब्दस्मारिका येन तद्दृष्टान्ताभिधानं युक्तं स्यात्।
किन्तु संकेतविषयशब्दस्मारिका ननु मयापि लिपिवत् शब्दसंकेतितचेष्टायाः शब्दस्मारकत्वमुच्यते। न तु अर्थसंकेतितचेष्टायाः
शब्दस्मारकत्वमतो नोक्तदोष इति चेत् मोद्यापरिहारात्॥ नहि अर्थसंकेतितायाश्चेष्टायाः संकेतबलात् शब्दवत्। अर्थानुभाव
कत्वात्। पृथक्प्रामाण्यमिति शंकमानं प्रति शब्दसंकेतितायाः चेष्टायाः पृथक्प्रामाण्येनाक्तीतिवचनं युक्तं येन मोद्यं न स्यात्
॥शब्द एव प्रमाणमर्थे क्लृप्तत्वादिति वा असत्यासंगतत्वप्रसंगाच्च। नहि चेष्टायाः शब्दे संकेतग्रहपक्षे अर्थे नामाण्यप्रसक्तिरस्ति ये
न शब्द एवार्थे प्रमाणं क्लृप्तत्वात्। इत्युक्तिः संगता स्यात्। अथवा चेष्टापदार्थानेरं च स्मारयतु। न तु शब्दानित्युक्तप्रयोगप्रसंगा
च्चा शब्देन सह गृहीतसंकेतायाः चेष्टायाः अर्थेन संगतिग्रहस्यायाः शब्दस्मारकत्वस्य अर्थस्मारकत्वस्य च स्वीकारायोगात्।
यद्यपि न चक्तं तथा मयापि चेष्टाभिप्रायानुमापिकास्तु किं शब्दस्मरणेनेत्याशंका विनाभावाभावादिति समाधानमुक्तं तदपि

न॥ ॥एडमूकस्याप्यनुमानाभावप्रसंगात्।यदप्युक्तं एडमूकस्यान्यगत्याम्रमाडिकमपिकल्पमीति।तदप्युक्तं एडमू
कस्यव्यवहारस्यभ्रममूलकत्वेनियमेनसंवादाभावप्रसंगात्।यदपि अथात्ताचेष्टापदार्थानेवस्मारयतन्नुशद्वान्।तथापिनप्र
माणंचेष्टायाःपदार्थस्मृतावपि अन्वयप्रकारकर्मत्वादेरुपस्थापकाभावेनान्वयबोधानुत्पादात्इतितदपिन।अन्वयबोधकवि
भक्त्यादिशून्यत्वेपिप्रत्यक्षानुमानवत्तत्संसर्गस्यार्थप्रत्ययजनकत्वेनैवप्रामाण्यसंभवात्नहिपूर्वपक्षिणाचेष्टायांशब्दत्वेन
प्रामाण्यमभ्युपगतंयेनान्वयबोधाजनकत्वेनप्रामाण्यंविहन्येत।यदपिपदैकदेशविभक्तिविशेषादिवच्चेष्टैकदेशविशे

अन॰ता॰
१३७
137

षात्तदुपस्थितिरित्याशंक्य पदैकदेशाविभक्तिविशेषवत् चेष्टैकदेशाभावादिति समाधानमुक्तं तदपि न। चेष्टाया एकदेशा
भावेपि कर्मत्वादिविशिष्ट एकचेष्टाविशेषस्य संकेतसंभवे कर्मत्वाद्युपस्थितिसंभवात्। यदपि कथं चेष्टातो व्यवहार इत्याशंक्य संशे
यप्रतिभयोरन्यतरस्मादिति समाधानमुक्तं। तदपि न। चेष्टातो निःशंकप्रवृत्तिदर्शनेन संशयप्रतिभयोरन्यतरस्मादित्यवधारणायो
गात्। चेष्टातोनुमिनोमीति व्यवहारदर्शनात् च। यदपि चत्वारि प्रमाणानीति तदप्ययुक्तं। अर्थापत्त्यादीनामिवोपमानस्यापि पृथ
क्प्रामाण्याभावात्। उपमानस्यानुमानांतर्भावस्तु प्रागेव दर्शितः॥ ॥इति श्रीमत्सकलनिधितीर्थश्रीचरणाचरणाराधकश्री
मत्सकलनाथयतिविरचिते अभिनवतांडवे शाब्दखंडः समाप्तः॥ ॥ श्रीरामदासार्पणमस्तु॥ ॥ॐ॥ श्रीः॥ ॥श्री॥ श्रीराम
चंद्रगुरवे नमः॥ ॥संवत १८५२ चैत्रशुक्लपक्षपुरन्वासि शनिवासरे॥ ॥रामवेदव्यासार्पणमस्तु॥ श्रीशिवविष्णु॰ राम॰
१३७

न्याय पत्र ३५०

१३५०

९६

इत्यभिनवतांडवेशब्दपरिच्छेदः

